रूपकमञ्जरीग्रन्थमाला-४

अपर्णा-मञ्जु-नीलिमा-स्मृतिग्रन्थः

उत्तरकुरुक्षेत्रम्

नाम

नाटकम्

पश्चिमवङ्ग-शिक्षाधिकार-सेवातो विश्रान्तेन प्राध्यापकेन
पश्चिमवङ्ग-संस्कृतशिक्षापरिषदः प्राक्तन-सदस्येन
श्रीविश्वेश्वर विद्याभूषणकाव्यतीर्थेन
विरचितम्

UTTARAKURUKṢETRAM

[Sanskrit Drama]

By

Pt. VISVESVARA VIDYABHUṢAṆA KAVYATIRTHA

CALCUTTA
1968

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

रूपकमञ्जरीग्रन्थमाला-४ अपर्णा-मञ्जु-नीलिमा-स्मृतिग्रन्थः

उत्तरकुरुक्षेत्रम्

नाम

नाटकम्

पश्चिमवङ्ग-शिक्षाधिकार-सेवातो विश्रान्तेन प्राध्यापकेन
पश्चिमवङ्ग-संस्कृतशिक्षापरिषदः प्राक्तन-सदस्येन
श्रीविश्वेश्वर विद्याभूषणकाव्यतीर्थेन
विरचितम्

UTTARAKURUKṢETRAM

[Sanskrit Drama]

By

Pt. VIŚVEŚVARA VIDYĀBHŪṢAṆA KĀVYATĪRTHA

CALCUTTA
1968

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कलिकाता रवीन्द्रभारती विश्वविद्यालयाध्यापक—
श्रीध्यानेशनारायण चक्रवर्ती एम्, ए, साहित्यशास्त्रिणा
प्रकाशितम् ।
"ऋषिधाम"
पोः अः—दत्तपुकुर, जिः—२४ परगणा, पश्चिमवङ्ग

प्राप्तिस्थानम् :
(१) ऋषिधाम
पोः अः—दत्तपुकुर,
जिः—२४ परगणा,
पश्चिमवङ्ग ।
(२) संस्कृत पुस्तकभाण्डार
३८ संख्यक विधान सरणी,
कलिकाता-६

To be had of:
(1) RISHI-DHAM
Po.—Dattapukur,
Dt.—24 Parganas,
West Bengal.
(2) Sanskrit Pustak Bhandar
38, Bidhan Sarani,
Calcutta-6.

मूल्यम्—रूप्यकचतुष्टयम्
Price—Rs. 4 only

All rights Reserved
सर्वस्वत्वं संरक्षितम्

Published by
Prof. Dhyanesh Narayan Chakravorty M.A. Sāhitya-Sāstrī
(Rabindra Bharati University, Calcutta)
"RISHI-DHAM"
Po.—Dattapukur, Dt.—24 Parganas, West Bengal.

Printed by Calcutta Oriental Press (Pv.) Ltd. 9, Panchanan Ghose Lane, Calcutta-9.

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

श्रीः

प्राक्कथनम्

[भारतसंस्कृत्यां संस्कृतभाषायाः स्थानम्]

भारतसंस्कृतेरितिहासे देवभाषायाः संस्कृतभारत्या अनुशीलनस्य एको विशिष्टाध्याय आस्ते। स हि वर्तमानकाले विस्मृतप्राय उपेक्षितश्च। अत्र प्रथममेव स्मृतिपथमायाति प्राचानाचार्य्याणां गौरवमयमवदानम्। छायास्निग्ध-मनोरम-पल्लीकुञ्जेषु तेषां स्वकीय-निभृतनिलये आसीत्तदा एकैकं संस्कृत-विद्यायतनम् व्यवहितं समन्ताद् दूरपल्लीव्रजेभ्यः।

संस्कृतसाहित्य-धर्मशास्त्र-पुराण-दर्शनादीनां पठनपाठनं तत्राभूत् शास्त्र-निष्णातानामध्यापकानां पुण्यावदानेन। अन्नदानपूर्वकं स्वकीयावासे आश्रय-प्रदानपूर्वकं च विद्यार्थिभ्यो विद्यादानव्रतस्य एतद्दृष्टान्त अतुलनीयोऽन्यत्र विरलश्च। स्वल्पाशन-वसना विद्याव्रता ब्राह्मणपण्डिता निभृते संस्कृतेरिमं मङ्गलप्रदीपं प्रज्वाल्य संरक्ष्य च तं देशस्य सांस्कृतिकजीवनगठने यां महतीं साधनामुद्यापयामासुः, सा चिरं विश्वमानसमनुभावयति। स्मरामि तदेतत्-प्रसङ्गेन, तेषां ज्ञानतापसानां धर्माचार्य्याणां मधुरव्याख्यान-शास्त्रालोचन-ललित-कथाकाकली-कलभाषितानि, अपराह्णकालीन-पल्लीवासि-प्रतिवेशि समावेशे च तेषां रामायण-महाभारत-पुराण-धर्मशास्त्रादीनां व्याख्यानानि, यानि जिज्ञासूनां कौतूहलं निवर्तयामासुः, विनोदयामासुश्च गृहिणां मानसानि शोकतापहरैः पुण्यकथाप्रसङ्गैरानन्दानुभावैश्च। विजातीय-शिक्षाप्रभावेणैषां पुण्यचरितानां शुभचरितेषु अधुना अनालोचनतया सामाजिकैरनादृतेषु, अनालोचितैश्च तत्सु ऐतिहासिकैः साहित्यकारैर्वा, तेषां निभृत-तपस्विनां कीर्तिसमुज्ज्वला सुधामयी सा तपस्या अद्यापि संस्कृतसाधनाया धारां संरक्षति। सत्स्वपि साम्प्रतिके काले अर्थकरीविद्यानां विचित्रसमारोहेषु. पूर्वसूरीणां ज्ञानसाधनाया अनुक्रमेणा-स्मद्देशे संस्कृतविद्यानिलयाश्च वर्तमानाः पुरातनीं ज्ञानसाधनवृत्तिं कथमपि

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

संरक्षन्ति। तेनाद्यापि भारतवर्षे विभिन्नप्रदेशेषु ध्वनन्ति संस्कृतकवीनां ललित-कम्बुकण्ठाः सरस-सरल-संस्कृत-साहित्यविरचनमाध्यमेन। अद्यापि प्रवर्तन्तेऽत्र मध्ये मध्ये संस्कृतसम्मेलन-संस्कृतभाषण-संस्कृतनाटकानां प्रयोगादिभिः संस्कृतसाहित्यस्य तथार्य-संस्कृतेः प्रचारव्रताणि। नाना-प्रातिकूल्याद् युगधर्मविपर्य्ययाच्च क्लेशकण्टकिता, नितरां व्याहता चापि संस्कृतेः प्राणभूतेयं संस्कृतानुशीलनसाधना स्वकीयमहिम्ना पूर्वाचार्याणां साधन-गौरवेणात्मानं रक्षति। राजते तेनैषा सुचिरमनिर्वाण-ज्योतिःशिखया अस्माकं संस्कृतसाधना मन्दिरगर्भविलसिता मङ्गलदीपमालेव संस्कृतसाधकानां रसिकसुधीजनानां च अनुरागमाहात्म्येन। भारतात्मनो रक्षार्थं कल्याणार्थं च जनानां, सर्वाभ्युदयकरी चिरकल्याणमयी चैषा साधना अस्माकं मङ्गलकृते संरक्षणीया। सा हि अस्मान् मृत्युञ्जय-सुधारस-सञ्चारेण पुनातु।

तत् प्रथममेव दिव्यधामगतानां पूर्वाचार्याणाममरस्मृतिं समुद्दिश्य श्रद्धा-वन्दनं निवेदयामि।

संस्कृतिः—संस्कृतिर्मानवजातीनामितिहासं रचयति। धर्मेण सार्द्ध-मियम् अङ्गाङ्गिभावेन अनुस्यूता। इयं हि सङ्क्षेपतो धर्मस्य तथा मानव-सभ्यतायाः प्रकाशमूर्तिं जातीनामस्तित्वं संरक्षति, यच्छति च परिचयं तत्तत्-सभ्यताखरूपस्य। संस्कृतिं तथा धर्ममेव धारयन् सञ्जीवति मनुष्यसमाजः। तद्विरहितोऽसौ विलुप्तिं गच्छति। "धर्मो रक्षति धार्मिकम्"—तेन च, "धर्मो रक्षति रक्षितः" इति नीतिवाक्यं तत् सत्यं प्रचारयति। तस्मात् तेजसा सार्द्धमनलस्येव तत्त्वतो धर्मं संस्कृत्योरन्वयः अविच्छेद्यमेकत्वं च।

किं च संस्कृतिः संस्मृतिर्वा मानवजातीनामात्मचेतनां बोधयति, उद्दीपयति, विकाशयति, प्रकरोति च मर्त्यान् महिमदीप्तान्, समुन्नतान् अक्षयांश्च। संस्कृतिरेव शाश्वतकल्याणस्य तथा ऐहिक-पारमार्थिक-सम्पदां लाभहेतुः। इयमेव जातीनां जीवनशक्तिर्यस्याः संरक्षणेन मानवा जीवन्ति, विसर्जनेन च विलुम्पन्ति धरातलेभ्यः। अतएव संस्कृति-संरक्षणेन जयश्रियः, तत्-परिवर्जने च पराजयः, इति इतिहास एव प्रमाणम्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कुरुक्षेत्रस्य वार्ता—विश्वमानवानामितिहासे भारतसंस्कृतेरेकं गौरवोज्ज्वल-मालेख्यं चित्रितमस्ति। संस्कृतिपुष्टा पाण्डुतनया धर्मेप्रतिष्ठिता सत्यधर्मा-श्रयेण विजयमाल्यम् आप्तवन्तः। अपरतः कौरवाः संस्कृतिविच्युता नीति-हीना धर्मभ्रष्टाः पराजयेन क्षयमापद्यन्त। पाण्डवानां क्लेशकरुणं कण्टकमय-जीवनं संस्कृतिमहिम्ना स्वधर्मबलेनैव अपराजेयमक्षयं च समभवत्। विजय-लक्ष्म्याः प्रसादेन पुष्टं तेषां चरितं शौर्य-वीर्य-त्याग-महत्त्वैः स्वधर्मपालनैश्च महिममण्डितं सर्वैरभ्यनन्द्यत। वृन्दावनेषु यो हि प्रध्वनितः प्रेममयो वंशीनिनादः, स हि संस्कृतेस्तथा जीवन-माङ्गल्यस्य वार्तां प्रचारयामास। तस्यैव प्राणविग्रहो भगवान् वासुदेवः कुरुक्षेत्रप्रान्तरे पाण्डुसुतानामाध्यात्मिको नायकः, तेषां जीवनदैवतस्वरूपं संस्कृतेर्दिव्यप्रवर्तकश्च। अवज्ञाय च संस्कृतिं, महालीलाभिनेतुस्तस्य शुभोपदेशमुपेक्षमाणाः कौरवा धर्मभ्रष्टा विनाशमाजग्मुः।

द्वारकायां विसर्जनलीला—अन्यतश्च द्वारकाया रङ्गमञ्चेषु संस्कृति-हीनतायाः सुकरुणोऽभिनयः प्रभासे अश्रुसिक्तां महाविसर्जनलीलां प्रकटयति। स हि यादवानां नीतिविच्युतेर्विषादमय इतिहासः।

मदोन्मत्ता यादवा उच्छिन्नसंस्कृतय आत्मचेतनाविहीना नीतिं परिहृत्य शुभबुद्धिं विसर्जयामासुः। शिवं सन्त्यज्य अशिवं भजमाना भोगैश्वर्यप्रसक्ताः शक्तिप्रमत्तास्ते परस्परकलहेन सत्यभ्रष्टा विलयं प्रापुः। तेन शोणितसिक्तां कलङ्कमलिनां स्वपुरीं सन्त्यज्य धरातलादन्तर्हिते तस्मिन् महालीलानायके भगवति श्रीकृष्णे, कनकहर्म्यमालिनी द्वारका प्रलयसिन्धुप्लावनेन ध्वंसमुपागता। आनन्दमुखराया वीरभूमे र्यदुराजधान्या इयं विलुप्तिः संस्कृति-विच्युताया एकस्या मानवजीवन-धाराया अश्रुमयमवसानं प्रचारयति। प्रभासतटे प्रध्व-नितोऽसौ विसर्जनस्य विषादमयो वंशीनिनादोऽद्यापि प्रतिध्वनति विश्वेषु।

भारतसंस्कृतिः—भारतवर्षस्य शुभसंस्कृतिः महर्षीणां तपसा सुगठिता, वीर्यमयी, अमृते प्रतिष्ठिता च। सर्वसम्पत्-समलङ्कृता मङ्गलमयी चेयं सत्यशिव-

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सुन्दरस्यार्चनेन सकलाभ्युदयप्रदा कल्पलतेव प्राकाम्येन कल्याणनिचयं विततार। तेनासीदस्माकं जीवनं दिव्यप्रसादेन परिपुष्टं शान्तिसौख्यमयं च मृत्युञ्जयस्य करुणाभयमङ्गलवरेण।

तस्या मर्मवाणी—"नायमात्मा बलहीनेन लभ्यः।"

"आत्मानं विद्धी"ति उपनिषदां शुभाह्वानं चिरन्तनं जयति। संस्कृतिरात्म-साधनम्। सा हि धर्ममूला, सदाचरणैः सत्यसाधनै र्विकशिता चेतनां बोधयति, उद्दीपयति, पोषयति, संरक्षति चास्माकं जीवितं शक्तिदानेन। तेनैव वयममृतलाभाय शिवमाराधयाम, अशिवं परिहरेम, असत्यं जयेम, विन्देम च सर्वात्मकं विजयश्रियं वीर्यबलेन, आध्यात्मिक-पारमार्थिकैहिक-शक्तिसम्पदा च। अतो वयम् "अन्धं तमः प्रविशन्ति येऽविद्यामुपासते", "ते चात्महनोजनाः" इत्यादिकामौपनिषदीं वाणीं स्मृत्वा तपस्याम सत्य-साधनममृतलाभाय, "ॐ अग्ने नय सुपथा राये अस्मान्" इति।

साम्प्रतिक-विपर्ययः—दुर्भाग्यवशात् साम्प्रतिके काले एतद्देशेऽपि समुपस्थितो दुःखकरो वैदेशिक-भावतरङ्गः। तेन समुद्भवन्ति बहवोऽनर्थाः, अनैक्यानि, विशृङ्खलाः, असन्तोषाः मूढ़त्वं च। उत्कट-भोगलिप्सया, प्रभुत्वस्पृहा-संकीर्णस्वार्थचिन्तनकालुष्यैश्च दलगत-गोष्ठीगत-प्रादेशिक-प्राधान्य-प्रचेष्टादिभिश्च जनानां संहतिश्छिन्ना, विलुप्तश्च देशात्मबोधः। तेन सामग्रिकी देशहितैषणात्मिका शुभबुद्धिर्निर्वासिता। प्रभवन्ति च ततः सर्वथा अकल्याणानि। या हि अमृतमयी धर्मसंस्कृति र्वीर्यमयी एतावत्कालं महत्-स्वपि विपर्ययेषु अस्मान् संरक्ष्य शक्तिसौख्यमखिडतान् महिमोज्वलांश्चाकरोत्, अद्यत्वे कापि दुष्टबुद्धिरस्मान् ततो विश्लेष्य दूरीकृत्यचास्मान्, परानुकारितया वीर्यरहितान् विधाय स्वधर्मविमुखान् भ्रष्टविवेकानसहायांश्च प्रकरोति! निरानन्द-मयी चैषा कलङ्कमलिना विच्युतिः प्रमत्ता अस्माकं सुमहता त्यागेन तपसा च लब्धं स्वाधीनतागौरवं म्लानीकुर्वती किं पुनरत्र द्वारकाया वियोगान्तां महा-विषादकरीं विसर्जनलीलां सूचयिष्यति?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अत्र चिरमेव स्मरणीयमेतद् यत् कुरुसुतानां यादवानां च परिणामे यत् सङ्घटितम्, नीतिच्युतानां मानव-समाजानां, जातीनां, देशानां च विषयेऽपि तत् सत्यं सम्भवतीति। श्रीभगवानस्मांस्तस्मान्महाभयात् परिरक्षतु। माऽभूच्च तस्य विपर्ययस्य ऐतिहासिकं पुनरावर्त्तनम्।

त्राणोपायः—अस्माभिरात्मरक्षणं विधेयम्। 'अमृतस्य पुत्रै' रस्माभिरमृते प्रतिष्ठितैस्तामेव आत्मसु अवस्थितां स्वकीयामृतमयीं सञ्जीवनशक्तिं संरक्ष्य संस्कृतिबलेन, धर्मेण, सत्येन, शीलेन, प्रज्ञया, शौर्येण, वीर्येण प्रेम्णा च सुसंनद्धैः शुचिस्निग्धे सुविमले जीवने विजयमहिमोज्ज्वलं विधातुरभयमङ्गलमानन्दप्रसादामृतम् उपभोक्तव्यम्, परिवेषणीयं च तत् निखिलजनेभ्यो विश्वेषां कल्याणाय।

अतः कुरुक्षेत्रे कुरुसुतानां शोचनीया परिणतिस्तथा द्वारकायां च यदुवीराणां प्रणाश, एतदुभयकादस्माकं शिक्षणीयमास्ते, यद् वीर्यमेव वीरं प्रसादयति, तपसैव च तत् समालभ्यते, विजयलक्ष्म्याश्चकरुणासिक्तं जयमाल्यं संस्कृतिसाधनमाहात्म्येन प्रापणीयेति।

नाटकप्रसङ्गः—उत्तरकुरुक्षेत्रमित्याख्यं नाटकं मम हृदयालेख्यानामपरं भावमयं रूपचित्रणम्। चत्वारिंशद्वर्षव्यापिनि ममाध्यापनजीवने देवभाषापरिशीलनसूत्रेण मदीय-च्छात्र-च्छात्रीणां निरन्तर-साहचर्ययुक्तं मङ्गलावदानमाहात्म्यं सुचिरं स्मरामि।

किं च देवभाषा-सम्प्रचारार्थं मदीय-संस्कृताध्यापन-प्रसङ्गेन संस्कृत-साहित्यसम्भार-विरचने, संस्कृत नाटकप्रणयने तथा तत् प्रयोगादिषु चैषां सानुराग सहायताविधानादिकं सविशेषमुल्लेखमर्हति। अत्र च **श्रीमदोङ्कारनाथ-सीतारामदास**-महर्षि-पादानां चिराशीःकरुणालाभेन तस्मै श्रद्धाप्रणतिं निवेदयामि।

आनन्दसंवादश्चायं यत्, हुगली-संस्कृत परिषदः षोडशवार्षिक महासम्मेलने संस्कृतानुरागिणस्तत्रत्या मे प्राक्तनच्छात्रच्छात्रीवर्गाः सोत्साहमस्य

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नाटकस्य मञ्चप्रयोगेषु परमनैपुण्यप्रदर्शनेन समवेतानां नरनारीनिवहानां सश्रद्ध-प्रशंसनं शुभेच्छां च समलभन्त। मद्विरचित-संस्कृत संगीतानामाधुनिकरीत्या मधुरस्वरसंयोजने तत्परिवेषणे च तैरसाधारणकृतित्वं प्रदर्शितम्। तद्विषये श्रीमत्तपन-वन्द्योपाध्यायं तथा श्रीज्योतिर्मयी वन्द्योपाध्याय-श्रीसुवर्णा वसु-प्रमुखां स्तथा मुख्यपरिचालकमध्यापक-श्रीसुनीलेन्दु भट्टाचार्य एम्, ए, वि, टि, प्रमुखं च सादरमभिनन्दामि। अभिनन्दामि च मदीय नाटकानामन्यत्र-प्रयोगेषु लब्ध प्रशंसनान् कलिकाता संस्कृतसाहित्यपरिषत्-सदस्यान् कृतिनोऽध्यापकांस्तथा चोत्साहिनो विद्यार्थिनः, संस्कृतानुरागिनश्च विभिन्नस्थानीयान् सुधीरसिक-सामाजिकानादरेण।

विभिन्नप्रतिष्ठानेषु मत्कृत-संस्कृतनाटकानां सुष्ठुप्रयोगसाफल्यात् तथा कलिकाताकाशवाणी-प्रतिष्ठान-कर्तृपक्षीयैरेषां पुनः पुनः सम्प्रचारण-सौजन्याच्च तत्तन्नेतृवर्गेभ्यः सश्रद्धकृतज्ञता विज्ञापयामि, सफलं मन्ये च नितरां मम सारस्वतव्रतसाधनार्थं संस्कृतसाहित्यविरचनश्रमं नानास्थानीय-विद्यार्थि-विद्यार्थिनीमण्डलानां रसिकानां सुधीजनानां च उपचीयमान-संस्कृतानुराग दर्शनेन, दूरदूरान्तरेभ्यश्च सुचेतसां महात्मनां शुभाशंसनाभिनन्दनपत्रलाभेन। अतो विजयन्तां पुण्यशीलाः, रमतां च सुरभारती सतामादरेण जगतां श्रेयोलाभाय!

आवेदनम्—अर्थसङ्गतेरभावादवशिष्टानां मद्विरचित-ग्रन्थानां प्रकाशनं व्याहतं तिष्ठति। पुरा विद्योत्साहि-नरपालानां तथा च पुण्यचरितानां भूस्वामिनामानुकूल्येन, दानधर्मव्रतेन च संस्कृतसाहित्यप्रचारः समपद्यत। तेषामौदार्यमण्डिता शुभचिकीर्षा सद्ग्रन्थप्रकाशने शास्त्र-संस्कृति-संरक्षणादिषु च विशेष सहायभूताऽभवत्। अधुना चैतन्महत्कृत्यं राष्ट्राधिनायकानामुदार-चेतसां च मनीषिणामुपरि स्वभावतः समापतितम्।

भारत संस्कृतेर्धारकवाहकानां स्वदेशीयानां कल्याणार्थमत्र विषये देशनायकानां महतां च सानुग्रह दृष्टिमानुकूल्यं च प्रार्थये!

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

श्रद्धानिवेदनम् :—मम संस्कृतसाहित्यप्रचारेऽशेषगुणालङ्कृतस्य वाराणसी-संस्कृत-विश्वविद्यालयोपकुलपतेर्महामणीषिणः **डः श्रीगौरीनाथ शास्त्रि**-एम. ए. पि. आर्. एस्—डि. लिट् महोदयस्य निरन्तरशुभेच्छा-प्रेम-प्रणोदितां सहयोगितां स्मरामि। तस्मै मे सबहुमान-श्रद्धाविनयपुरःसरां कृतज्ञतां निवेदयामि।

सारस्वतसाधनायां मम सुचिरशुभानुध्यायिनामशेषगुणालङ्कृतानां विद्या-प्रेम-तपोनिलयानां पण्डितराज-**श्रीश्रीजीवन्यायतीर्थाणां** तथा परम-माननीय-कुलपतिकल्प - **महामहोपाध्याय** - **श्रीकालीपदतर्काचार्याणां** च सप्रेमशुभाशंसनादिकं सविशेषं स्मरामि। एभ्यो महामनस्विभ्यो मे सुनिविड-श्रद्धा-प्रीति-नति-पुष्पाञ्जलिं निवेदयामि।

उपसंहारः—एतन्नाटकस्य कलिकाता-संस्कृत-साहित्य-परिषत्-पत्रिकायां प्रकाशने ततश्च ग्रन्थरूपायणे प्रथममेव सानन्दं स्मरामि कुलशील-विद्यादि-भूषणस्य यादवपुर-विश्वविद्यालय-संस्कृताध्यापक — **डः श्रीगोपिकामोहन भट्टाचार्य** एम, ए, डि-फिल्, न्यायतीर्थप्रमुखाणां तथा संस्कृत-परिषद्-विद्यालयाध्यक्षाणामशेषगुणालयानां पण्डितप्रवर — **श्रीरामधनकाव्य-व्याकरणतीर्थ** महोदयानां च सानुरागसाहाय्यकं यदन्तरेणास्य प्रकाशनम-सम्भवमभिष्यत्। एतेषां सुचेतसां समूहकल्याणं विजयश्रियश्च कामये।

मदात्मजेन रवीन्द्रभारती-विश्वविद्यालयाध्यापक—श्रीमद्ध्यानेश-नारायण-चक्रवर्ति-साहित्यशास्त्रिणा तस्य सारस्वतव्रताङ्गभूत—संस्कृतसाहित्यप्रचार-साधनायाः साफल्यार्थमस्य ग्रन्थस्य प्रकाशने सौष्ठवविधाने च सर्वविध आयासः परिगृहीतः पूर्णतां प्रापितश्च साफल्येन। देवी ब्रह्मवाणी महतां शुभाशिषश्च संवर्द्धयन्तु श्रीमन्तं करुणाप्रसादेन।

कृतज्ञताज्ञापनम्—परिशेषे संस्कृतसाहित्यप्रचारे मम सुचिरशुभानु-ध्यायिनं "सुदर्शन" पत्रिकासम्पादकं **परमभागवत-श्रीशिशिरकुमार ब्रह्मचारिणं**, हुगली-संस्कृत-परिषत्-सम्पादकमशेषगुणालङ्कृतं **श्रीकाशीनाथ**

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

विद्यानिधि - काव्यतीर्थमहाशयं च मम श्रद्धाप्रेमपुरःसरां- कृतज्ञतां विज्ञापयामि। एतद्विषयेषु मम सर्वसहायकं कलिकाता महा-उद्धारएमठ-वासिनमशेष-प्रेमभाजं **श्रीमद् बन्धुदास ब्रह्मचारिणं,** मदीयसुहृद्वर्गं तथा संस्कृततानुरागिणश्च सर्वान् मम सादरशुभेच्छापरिपूतां निविडप्रीतिश्रद्धां प्रत्यभिनन्दनञ्च ज्ञापयामि। ॐ तत्सत्।

ॐ रुद्र यत्ते दक्षिणं मुखं तेन मां पाहि नित्यम्। ॐ ब्रह्मार्पणमस्तु।

निवेदनमिति—

दत्तपुकुर पल्लीस्थ
"ऋषिधामा"ख्य-भवनात्
१३७५ वङ्गाब्दीय
दोलपूर्णिमा-दिवसीयमेतत्।

सुरभारती-चरणारविन्द-मकरन्द-सुधानिस्यन्द-
पानव्रतिणो
विनयावनत—**श्रीविश्वेश्वर विद्याभूषण**
देवशर्मणः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

उत्सर्गपत्रम्

ये खलु तिमिराच्छन्ने मदीय हृदयमन्दिरे ज्ञानस्य मङ्गलदीपं
प्रज्वाल्य निरन्तर-शुभस्नेह-विद्यादानैः सारस्वत-
साधनायां मां प्रावर्तयन्, येषां पुण्या-
वदानमाङ्गल्यैस्तपो मे सुधा-
सिक्तं महिम-मधुरं च भवति, नित्याशीर्दृष्टि-
मङ्गलकिरणधारां विकिरतां दिव्य- धामगतानां
तेषां गुरुपादानामुद्देशतो ग्रन्थमिमं श्रद्धाप्रणतो निवेदयामि।

निवेदनमेतत्
चिरस्नेहप्रार्थिनो-दीन—
श्रीविश्वेश्वर विद्याभूषण देवशर्मणः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

गुरुमण्डली

(१) श्रीमद् ऋषि कालीकिङ्कर स्मृतिभूषण—पितामहपादाः ।

(२) अशेष शास्त्राचार्य-कृष्णकान्त कृतिरत्न—पितृपादाः ।

(३) चट्टल-संस्कृतमहाविद्यालयाध्यक्ष-महामहाध्यापक-
रजनीकान्तसाहित्याचार्य—ज्येष्ठतातपादाः ।

(४) चट्टल-संस्कृतमहाविद्यालयोपाध्यक्ष – योगाचार्य-कालीकिङ्कर
तर्कपञ्चाननाः ।

(५) पुण्यश्लोक-रजनीकान्ततर्कचूड़ामणि—गङ्गाधर काव्य-
व्याकरणतीर्थ-कलिकाता संस्कृत महाविद्यालयाध्यापक—
राजेन्द्रनाथ विद्याभूषण,-गुरुपादाः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

शुभाशंसनम्

हुगली-संस्कृतपरिषदायोजित-पश्चिमवङ्ग संस्कृत महासम्मेलनपक्षतः
कविवर श्रीविश्वेश्वर विद्याभूषण काव्यतीर्थ महोदयानां संवर्द्धनम्।

लब्ध्वा जन्म शुभद्विजान्वय-महासिन्धो र्य इन्दूपमः
स्निग्धः सुन्दरभास्वराकृतिधरः शान्तस्वभावः स्वतः।
विद्याकान्तिकिरश्चिराय रचयन्नन्ते वसन्मानसम्,
स्वच्छं भावविशारदं स जयताद् विश्वेश्वरो भूसुरः॥
विद्याभूषण-काव्यतीर्थपदभाग् विश्वेश्वरः साधकः
श्रीसारस्वतमन्दिरस्य सरसस्येन्दीवरश्रीमतः
नाना नाटक-काव्य-कोमलकला-मालाभिरभ्यर्चयन्,
देवीं वाचमसौ विराजति सतामानन्दसन्दीपनः॥
ललितपदमृणालालम्बिता पद्यमाला,
निजकरकलिता या पद्ममालाभिरामा।
लसति सुरगिरायाः कण्ठहारायमाणा,
दिशतु सुरभिभारं सैव विश्वेश्वराय॥
अद्यानन्दभरेण संस्कृत महासम्मेलनं भास्वरं
श्रीविश्वेश्वरसंज्ञकं कविवरं संवर्द्धयद् भ्राजते।
श्रीमान् मानवसङ्घ-मङ्गलकरं ग्रन्थोच्चयं कल्पय-
न्नायुः पूर्णमवाप्य भारतधरा-धारा-धुरामावहेत्॥

षोडशवार्षिक महासम्मेलने
१३७४ वङ्गाब्दीय
सौरचैत्रस्य दशमदिवसीयम्।

परिषत्-पक्षतो विरचितं
श्रीश्रीजीव न्यायतीर्थेन।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

हुगली राष्ट्रिय विद्यालयस्य प्रधान संस्कृताध्यापक-
श्रीविश्वेश्वर-विद्याभूषण-काव्यतीर्थ-काव्यरत्न-
महोदयस्य अवसरग्रहणोपलक्ष्ये

सम्वर्द्धनम्

भो भोः सभ्यजना, अयं सुविदितः सद्ब्राह्मणो धार्मिको
नित्याध्यापन-पूजनादि-निरतो वेदार्थवित् तत्त्वविद् ।
सम्मानं यदि दीयतेऽद्य वत तत् किं नूतनत्वं व्रजे-
दित्येवं न हि शक्यते गणयितुं केनास्य संवन्दनम् ॥१॥
वैचित्र्यं तव चित्रकाव्यरचने वैदग्ध्यमक्लेशतो
नाना भावमयी कथा विकथने हास्यं सदास्ये च ते ।
वेदान्तेषु निगूढतत्त्वविषये कास्माकमासीत् कथा
काप्येवं स्मितपूर्णभाषि सुजनस्यालाप आकर्णितः ॥२॥
हीनं तत् परसेवनं बहुविधक्लेशापमानास्पदं
यच्चूर्णीकुरुतेऽत्र धर्ममपि सद्भावञ्च सत्याश्रयम् ।
त्यक्त्वा तच्चिरमेव मोहमदिरा-लोभास्पदं सन्ततं
विश्रामं लभतेऽद्य शान्तसुजनः स्वाधीनतामाश्रितः ॥३॥
अमन्दं वात्याकम्पित-दलित-विभ्रान्त-कमलाद्
बलाद्दूरे नीतं यदि भवति पद्मान्तरमपि ।
चिरस्नेह-प्रेमोत्कलन-ललिते वै सुविहिते
न तत्र स्याद्दोषः कतर-कमलस्यापि सुजनः ॥४॥
सुस्थो जीव सुपण्डित ! प्रतिदिनं स्वेष्टञ्च ते वर्द्धतां
याहीतोऽपि तथा विलीनमनसा विष्णोः पदं संस्मरन् ।
आयाहि स्वयमत्र सर्वसमये विद्यालये स्वेच्छया
काम्यं ते शुभयाचनं विभुपदे, शम्भुः स संप्रीयताम् ॥५॥
निवेदनमिति—

१८८१ शकाब्दीय
सौर-ज्यैष्ठस्य तृतीय-
दिवसीयम् ।

गुणमुग्ध-साध्यापकच्छात्राणाम् ।
भट्टपल्लीवास्तव्याध्यापक—
श्रीविश्वनाथ काव्यव्याकरण
न्यायतीर्थेन विरचितम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सारस्वतसाधना—स्वरचितग्रन्थमाला

(Works by the author)

दस्यु रत्नाकरम्	...	...	संस्कृतदृश्यकाव्यम्
भरत-मेलनम्	...	...	,,
वाल्मीकि-संवर्द्धनम्	...	...	,,
प्रबुद्ध-हिमाचलम्	...	...	,,
उत्तर-कुरुक्षेत्रम्	...	...	,,
मातृपूजनम्	...	...	,,
काशी-कोशलेशम्	...	...	,,
ओङ्कारनाथ-मङ्गलम्	...	...	,,
विष्णुमाया	...	...	,,
द्वारावती	...	...	,,
उमातपस्विनी	...	...	,,
काव्यकुसुमाञ्जलिः	...	...	संस्कृत-खण्डकाव्यम्
वनवेणुः	...	...	संस्कृत-गीतिगुच्छम्
मणिमालिका	...	...	संस्कृत-कथासाहित्यम्
पद्मराग	...	...	वङ्गभाषानिबद्ध-कवितासम्भारः
मानसी	...	...	वङ्गभाषानिबद्ध-प्रबन्धावली
गङ्गासुरतरङ्गिणी	...	...	संस्कृत-काव्यम्
Message of the Divine Mother		..	आङ्गलभाषामय-निबन्धाः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पात्रवर्गः

पुरुषाः—

सूत्रधारः
श्रीकृष्णः
अर्जुनः
युधिष्ठिरः
धृतराष्ट्रः
नारदः
यादवाः
तपस्विनः
दारुकः
हस्तिनापुरसैनिकाः
सुलोचनः
विनोदः
दधिविक्रेता
मोदकविक्रेता
पाण्डव-राजसदस्याः
पुरोहिताः
परीक्षित्
शृङ्गी
शमीकः
शुकदेवः
जनमेजयः
ब्राह्मणवेशी आस्तिकः
ब्राह्मणाः
यज्ञस्थलवासिनः

स्त्रियः —

माधविका (नटी)
गान्धारी
द्रौपदी
कुन्ती
रुक्मिणी
सत्यभामा
पुरलक्ष्मीः
पुराङ्गनाः
वनलक्ष्मीः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha



CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

उत्तरकुरुक्षेत्रम्

प्रस्तावना

नान्दी

कालिन्दीकुञ्जचारी नवघनरुचिरः श्यामलः शान्तमूर्त्ति-
र्यः कंसध्वंसकारी कुरुकुलसमरे दिव्यगीताप्रचारी।
प्राणानन्दः प्रमूर्तः सुर-नर-रमणो गोपिकाचित्तचारी
सोऽयं पायाच्चिरं वस्त्रिभुवनशरणं पापहारी मुरारिः॥

नान्द्यन्ते सूत्रधारः—अहो, अद्य तावन्मधुपूर्णिमोत्सवप्रसङ्गेन नानादिग्देशेभ्यः समागता नरनार्य्योऽत्र प्रातर्माधवमर्चयित्वा अधुना श्रीमल्लक्ष्मीनारायण-मन्दिरप्राङ्गणे आनन्दं कुर्वन्ति। पश्यामि तेन—

आयाता मधुपूर्णिमाद्य भुवने फुल्लारविन्दानिला
यस्यां गोपवधूविलासमुखितः संक्रीडितो माधवः।
कालिन्दीपुलिने तदत्र ललिते वृन्दावने श्रीहरि-
र्नित्यं दीव्यति चिन्मयात्मरसिकस्तद्भावुकैर्भाव्यते॥

किञ्च—

इत्थं कोकिलगीतिमुखरे कालेऽत्र वासन्तिके
पुष्पाणां स्तवकैर्हसन्ति मधुरं कुञ्जाग्रवल्ल्यो वने।
भृङ्गाणां कलगुञ्जितैश्च भवति प्रेम्णां महाप्लावनम्
आनन्दः कुसुमायते स्थलजले विश्वं नरीनृत्यते॥

यातु। आह्वयामि नटीं तावत्। (नेपथ्यद्वारं गत्वा) आर्ये माधविके!

नेपथ्ये माधविका—(उच्चैः) देव, अथ किमादिशति भवान्?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सूत्रधारः—भद्रे, वक्तव्यमस्ति किञ्चित्। तद् आगम्यतामचिरेण।

[प्रविशति नटी माधविका]

प्रविश्य माधविका—नमोऽस्तु आर्याय! (प्रणमति) एषाऽहमागच्छामि।

सूत्रधारः—भद्रमस्तु देवि! वार्तां ते ज्ञापयामि। अद्यात्र शुभ-सन्ध्याया-मस्माकमभिनयदर्शनार्थं माननीयाः सज्जनाः प्रेमभक्तिधना मातृमूर्तयश्च साग्रहं प्रतीक्षन्ते। तदेतेषां मनोरञ्जनाय अस्माभिः संस्कृतनाटकं प्रयोक्तव्यमिति।

माधविका—(सहर्षम्) साधु साधु! वयमपि भवदादेशपालनार्थं सुसज्जिताः कालं प्रतिपालयामः। अधुना आर्यस्यानुमतिरेव प्रमाणम्।

सूत्रधारः—साधु भद्रे! युष्माकं यथायथमुद्योगं विदित्वोल्लसामि। तद् गत्वा विज्ञाप्यन्तामार्य-पारिपार्श्विकादयो यदद्यास्माभिरुत्तरकुरुक्षेत्रं नाम संस्कृतनाटकं सामाजिकानां विनोदायाभिनेतव्यमिति। तथा—

उत्तरमितिशब्दाद्यं कुरुक्षेत्रपदान्वयम्।
इदं हि नाटकं नाम चक्रे विश्वेश्वरो द्विजः।
कृष्णकान्तात्मजः श्रीमान् सारस्वतपदाश्रयः।
विदुषां परितोषाय भारतीकरुणाशया॥

माधविका—अहो, विजयते भवान्। तद् देव, किमधुना सहृदयाः सामाजिका देवभाषायामनुरागशीला भवन्तीति परिज्ञातुं कौतूहलं मे वर्त्तते।

सूत्रधारः—सम्यगुक्तमत्रभवत्या। इयं हि देवभाषा च्छन्दोमालिनी गद्य-पद्यमयी रसमञ्जुला न कस्य श्रवणमानसमनुरञ्जयति? संस्कृतभाषा हि भारतवर्षस्य प्राणमयी वाङ्मूर्तिरानन्दरसोज्ज्वला शाश्वती मर्मवाणी। अध्यात्मतत्त्वमयी, वेदोपनिषत्-पुराणादिशास्त्रेषु निहिता सुललित-कथासाहित्य-नीतिशास्त्रविमण्डिता चेयं युगे युगे भारतवर्षस्य मर्मवाणी

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रचारयति विश्वभुवनेषु। किञ्च, अतीतकीर्तिमुखरा चेतःप्रबोधिनी भारतकृष्टिप्रचारिणी चेयं सुरभाषा अद्यापि ललितरसभूयिष्ठमजस्र-नव-नव-साहित्यसम्भारं सम्माव्य सारस्वतानामवदानेन विश्वचित्तं विनोदयति।

माधविका—अहो, यथार्थमुच्यते देवेन। सुधामयी सुरभारती स्वमहिम्ना चिरं विजयते। किञ्च, संस्कृतविरहितं भारतवर्षं न कदापि सम्भवपरं न वा कथमपि एतच्चिन्तनीयम्। यतः, आसमुद्रहिमाचलान्तेऽस्मिन् उपमहादेशे भारतवासिनां मर्मग्रन्थिस्वरूपिणीयं पुण्यभाषा गृहिनिलय-देवायतन-तीर्थतपोवनेषु तथा विद्वज्जनसम्मेलनेषु च दैनन्दिनोपासन-यज्ञकर्म-देवार्चन-तर्पण-पितृपूजाप्रसङ्गेन स्वाध्याय-पुण्यमन्त्रस्तुतिवन्दनाद्यर्थं सार-स्वतविनोदनार्थं च व्यवह्रियते। गृहमेधिभिस्तथा वानप्रस्थसाधन-परैस्तपोधन-योगि-महर्षिभिश्चेयं नित्यं परिषेव्यते। अतः कथमस्मत्सुचिर-जीवनरसभूताम् अमृतात्मिकाममरभारतीं वयं परिहरामः?

सूत्रधारः—साधु भद्रे। सम्यगभिहितं भवत्या। नवनवसर्जनमयी सुमङ्गलेयं मृत्युञ्जयिनी देवभाषा आकल्पान्तमात्ममहिम्ना विराजिष्यते इत्यत्र कः सन्देहः? अतोऽहममरभारतीपदारविन्दसेवनव्रतिन एतन्नाट्यकारस्योक्ति-मत्र समुद्धृत्य वदामि—

पेपीयन्तां सुधां सर्वे संस्कृतसागरोद्भवाम्।
मानसे रमतां नित्यं भारते सुरभारती॥

माधविका—अहो, धन्या वयं सुरभारतीमहिमानुशीलनेन। तद् देव, अचिरेणाहं नेपथ्यं गत्वा माननीयान् पारिपार्श्विकादीन् भवन्नियोगं विज्ञापयामि। जयतु सुरभारती। [प्रस्थानम्]

सूत्रधारः (उपसृत्य)—अधुनाहं निश्चिन्तो जातः। तदहमपि कृत्यार्थमुद्-युक्तो भवामि। तेन भवदौ वन्दे श्रीभगवन्तम्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized by Siddhanta eGangotri Gyaan Kosha

(कृताञ्जलिः) आनन्दमूर्तिपरमो यमुनाविहारी
विश्वम्भरस्तनुभृतां हृदिपद्मचारी ।
गोविन्दमाधवहरिर्दुरितापहारी
कृष्णश्चिरं विजयतां कलवेणुधारी ॥

[उद्देशतः प्रणम्य प्रस्थानम्]

—इति प्रस्तावना—

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रथमाङ्कः

प्रथमदृश्यम्—कुरुक्षेत्रप्रान्तभूमिः

श्रीकृष्णः—(स्वगतम्) धर्म्मक्षेत्रं कुरुक्षेत्रम्। वीराणां रणभूमिर्ममैव च लीलाक्षेत्रमिदम्। (अर्ज्जुनं प्रति) पार्थ, अत्र समराङ्गनशायितैर्भारतवीरैः स्वर्गः सम्प्राप्तः, युष्माभिश्च लब्धं विजयमाल्यम्।

अर्ज्जुनः—यादव, स्वजनवियोगाहतस्य ममेदं विजयगौरवं न खलु सुखाय भवति। छिन्नवृन्तानामिव कुसुमदलानामस्मत्प्रतिष्ठा न हि शान्तिसौख्यमावहति।

श्रीकृष्णः—कथमयं निर्वेदो वीर? क्षत्रियस्तु न खिद्यति। न हि समुचितोऽयं विषादः?

अर्ज्जुनः—केशव, क्व नु तेऽस्मदात्मीया रणदुर्म्मदा महावीरा येषां सान्निध्यमस्मच्चिरमीप्सितम्! ते च मे आनन्दायिनो ज्ञातय आचार्या बान्धवाश्च न खलु साम्प्रतं जीवन्ति।

श्रीकृष्णः—मैवं धनञ्जय! धर्म्मयुद्धं क्षत्रियाणां श्रेयसे गौरवाय च। अतो वीराणां कृतेऽनुशोचनं न हि वीरचूडामणेस्तव युज्यते।

अर्ज्जुनः—(स्वगतमूर्द्ध्वदेशमुपलक्ष्य) नमोऽस्तु पूर्व्ववीरेभ्यः। (प्रकाशम्) किन्तु यदुपते, ते हि अस्माकमाबाल्यक्रीडासङ्गिनो मृगयायां विद्याभ्यसने च प्रियसहचराः पश्चात्तु राज्यलोभेन प्रतिपक्षभूता अधुना चिरनिद्रिता भवन्ति। (सोच्छ्वासम्) अधुना तानश्रुनीरैस्तर्पयामि।

श्रीकृष्णः—कौन्तेय, संसाररङ्गमध्ये कर्म्मसूत्रान्नराणामागमनिर्गमाः संयोगवियोगाश्च। धीरस्तेन न मुह्यति।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अर्ज्जुनः—सखे, कथं विस्मरामि पितृ-पितामहगतं सम्पर्कम्? तद्धि आत्मिकं बन्धनं प्राणेषु प्रवाहयति सञ्जीवनीं चेतनाधाराम्। सैव स्मृतिर्विह्वलयति मानसम्।

श्रीकृष्णः—वीर, विचित्रमिदं संसारनाट्यम्। नटानामिवात्र मनुष्यैरविचलचेतसा अभिनेतव्यम्। क्षत्रकुलजातोऽसि। तत् स्वधर्म्मपालनसाफल्यात् कुरुवीराणां कीर्त्तिस्त्वया रक्षिता।

अर्ज्जुनः—(स्वगतम्) इदं हि कुरुक्षेत्रमस्मत्पितॄणां कर्म्मभूमिस्तपःक्षेत्रञ्च। अधुना श्मशानभूमिश्चैतत्।

(श्रीकृष्णं प्रति) केशव, वीरकीर्त्तिविमण्डितेयं पुण्यभूमिरधुना अन्तःशोणितप्रवाहव्याकुला धूलिपांशुलविशालप्रान्तरा अतीतां संहारलीलां स्मारयति। अतो विह्वलोऽस्मि शोकेन!

श्रीकृष्णः—क्लैब्यं मास्म गमः पार्थ। स्मर्य्यतां गीतायां मे यदुक्तम्। कथं विस्मृतवानसि तत्त्वम्?

अर्ज्जुनः—केशव, कथं विस्मरामि वृत्तान्तम्? अद्यापि ध्वनतीव श्रुतिपटे प्रलयङ्करः स दुन्दुभिनादः! शोकार्त्तानां वीरनारीणां करुणविलापध्वनिरद्यापि धिक्करोति मम विजयगर्व्वम्! (मौनं तिष्ठति)

[प्रविशति युधिष्ठिरः]

प्रविशन् युधिष्ठिरः—सा हि सङ्गीतायते श्रुतिमूलेऽभयमङ्गलवाणी यतो धर्म्मस्ततो जय इति। (अर्ज्जुनं विलोक्य श्रीकृष्णं प्रति) केशव, तीर्थीभूतं कुरुक्षेत्रं वीराणामात्मदानेन। अत्र हि अस्मत्पूर्व्वजाताः कुरुप्रवीरास्तपसा वीरधर्मपालनेन च गौरवं गताः।

श्रीकृष्णः—साधु साधु, धन्योऽसि धीमन् पूर्व्वकीर्त्तिस्मरणेन। वयमपि युष्माकं सम्पर्केण धन्यतां गताः।

युधिष्ठिरः—अतोऽस्मत्पितॄणां धर्म्मभूमिं कर्म्मभूमिञ्चेमां पुण्यभूमिं प्रणमामः। (उद्देशेन प्रणमति)

श्रीकृष्णः—विजयतां धर्म्मपाल। धर्म्मव्रतं त्वामभिनन्दामि।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

युधिष्ठिरः—(अर्ज्जुनं निरीक्ष्य) किन्तु यदुपते, कथमिह धनञ्जयो विमनायमानस्तिष्ठति ? (अर्ज्जुनमुपगम्य) भ्रातः, किं ते विषादकारणम् ?

श्रीकृष्णः—धर्म्मनन्दन, शून्यकुरुक्षेत्रप्रान्तरदर्शनेन समुत्थितो धनञ्जयस्य शोकावेगः। अतीतः स्वजनवियोगोऽस्य स्मृतिपथमुद्गम्य विह्वलयति गाण्डीविनम्।

युधिष्ठिरः—(अर्ज्जुनं प्रति) अलं विषादेन वीर! उत्तिष्ठ, परिहर मोहम्। न हि शोभते संग्रामविजयिनस्ते चित्तचाञ्चल्यम्। (कराभ्यामुत्तोल्य शिरश्चुम्बति)

अर्ज्जुनः—(कृताञ्जलिः) आर्य्य, क्षन्तव्योऽहं दासः। अनुगृहीतोऽस्मि स्नेहेन। (प्रणमति)

युधिष्ठिरः—चिरं जीव वत्स! वर्द्धस्व गौरवेण। (श्रीकृष्णं प्रति) केशव, एष मे प्रियोऽनुजस्तवैव चिरप्रणयपात्रं सर्व्वथा त्वदनुशासने वर्त्तते।

श्रीकृष्णः—(सहर्षमर्ज्जुनं करेण धृत्वा) साधु साधु वीर! कौन्तेय, जानीहि न मे भक्तः प्रणश्यति।

अर्ज्जुनः—(कृताञ्जलिः) मधुसूदन, यथा नियुक्तोऽस्मि तथा करोमि। अतो वन्दे भवन्तम्। (प्रणमति)

श्रीकृष्णः—सखे, विजयस्व गौरवेण।

युधिष्ठिरः—(श्रीकृष्णं प्रति) यादव, परिसमाप्तम् अस्माकं कुलधर्म्मपालनं तव प्रसादेन। लब्धञ्च राज्यं परिपाल्यते धर्म्मेण। किन्तु, किमनेनाहं करोमि ?

श्रीकृष्णः—कथम् ?

युधिष्ठिरः—(सावेगम्) द्रुतं महासिन्धुतटमभिधावति मे जीवनरथः!

श्रीकृष्णं—धर्म्मनन्दन, जातं मया तव चित्तवैराग्यम्। किञ्च, प्राप्ते वयसि अभिमन्युनन्दनेन, तस्मै राज्यभारं समर्प्य करिष्यसि मोक्षसाधनं श्रेयोलाभाय।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

युधिष्ठिरः—जयतु यादवेश्वरः। एवं विजयते चिरं भवान् अस्माकं शुभानुध्यानेन।

अर्ज्जुनः—जय केशव, जय केशव।

श्रीकृष्णः—(युधिष्ठिरार्ज्जुनौ समुद्दिश्य) मयापि समाप्तं धर्मराज्यसंस्थापनम्। मतिमन्तः! आह्वयन्ति मां यादवाः। पिता च सोत्कण्ठो मां प्रतीक्षते। तद् इच्छाम्यहं स्वपुरप्रतिगमनाय।

युधिष्ठिरार्ज्जुनौ—(सोच्छ्वासम्) यादव, यादव!

श्रीकृष्णः—वर्द्धन्तां सखायः। (अर्ज्जुनं प्रति) देदीप्यस्व पार्थ! किं पुनर्वक्ष्यामि? भद्रमस्तु वः।

(युधिष्ठिरं प्रति) कौन्तेय, अभिभूतोऽस्मि। (उच्छ्वसति) आबद्धोऽस्मि पाण्डवानां प्रणयबन्धनेन।

अर्ज्जुनः—केशव, दीना वयं त्वया विरहिताः कथं जीवामः?

श्रीकृष्णः—अलं विषादेन प्रिय! एषोऽहं युष्माकं स्नेहबन्धनेन चिरसंबद्धस्तिष्ठामि। तद् विजयध्वं प्रणयमाहात्म्येन।

युधिष्ठिरः—धर्म्मो वर्द्धताम्। जयोऽस्तु जनार्द्दनस्य।

श्रीकृष्णः—भद्रमस्तु प्रणयास्पदानाम्। धर्म्मो युष्मान् रक्षतु।

[प्रस्थानम्]

अर्ज्जुनः—असहनीयः कृष्णविरहः! अहो, दुर्विषहो विच्छेदः!

युधिष्ठिरः—धैर्य्यमुपेहि प्रिय! ऐषोऽस्माकं प्रियसखो न कदापि अस्मांस्त्यजति। तदेहि! जननी किलास्मान् प्रतीक्षते। [प्रस्थानम्]

अर्ज्जुनः—वासुदेव, वासुदेव! [प्रस्थानम्]

[प्रविशति सहचरीपरिवृता पुरलक्ष्मीः, गायन्ति सर्व्वाः।]

गानम्

रणभारपीडिता जर्ज्जरमेदिनी
करोति रक्तस्रोतःस्नानम्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सुषमाहीना प्रकृतिर्दीना
मुञ्चति तप्तमश्रुजातम् ॥
आकुलविषादः खनति पवने
ध्वनति विलापो गगने भुवने
कुसुममालिनि जय पुरवासिनि
पृथ्वि जननि कुरु उल्लासम् ।
मा कुरु करुणे मरणविलासम् ,
विकाशय धरणि शान्तिहासम् ॥

इति प्रथमाङ्के प्रथमं दृश्यम् ।

द्वितीयं दृश्यम्—हस्तिनापुरप्रासादः

धृतराष्ट्रः—(स्वगतम्) विषमोऽपत्यस्नेहः । स हि सर्व्वानर्थकरो मम शोकाय भवति । हा पुत्र दुर्योधन, हा हा अभिमानधनाः शतपुत्राः ! अहो, एकोऽपि न जीवति । स्नेहपालिताः पापकर्म्मसु समर्थितांश्च ते मे तनयाः सुखदुःखान्यतिक्रम्य चिराय निद्रायन्ते । अहो, शल्यमिव उत्पाटयति हृदयं मे पुत्रशोकः ।

[प्रविशति गान्धारी]

प्रविश्य गान्धारी—कुरुनाथ !

धृतराष्ट्रः - केयम् ? गान्धारी ? एह्येहि शतपुत्रजननि !

गान्धारी—न हि युज्यते नाथ, एतदभिधानम् अभाजनेषु मद्विधेषु ।

धृतराष्ट्रः—राजनन्दिनि, धारय माम् । नाहं क्षमोऽस्मि प्राणधारणे ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

गान्धारी—राजन्, शतपुत्रगौरवेण प्राक् सौभाग्यवत्यपि साम्प्रतमहं दीनहीना शोचनीया च। वृथाहं जीवितं धारयामि।

धृतराष्ट्रः—देवि!

गान्धारी—महाराज, नाहं मानमर्हामि। एषा ललाटलिपिर्मामनाथां करोति।

धृतराष्ट्रः—(स्वगतम्) अहो, नियति-विधानम्। एषा दावदग्धा वल्लरीव परिक्लिश्यते कुरुराजेश्वरी दैवविधानेन। [गान्धारीं प्रति] देवि, निर्वापय हृदयानलमश्रुप्रवाहेण। को हि दैवं लङ्घितुं प्रभवति?

गान्धारी—वृथैव नरनाथ, विधिरत्र निन्द्यते। आत्मकृतं कर्म्मफलं को नु पुनः खण्डयेत्?

धृतराष्ट्रः—हा कर्म्मफलम्! अवश्यमेव भोक्तव्यमात्मनः कर्म्मणः फलम्। तेन धिङ्माम्। अमिमृष्यकारिता हि मम भाग्यहीनतामानयति। किन्तु गान्धारि, कथं विडम्बयति त्वां तवापि भाग्यम्?

गान्धारी—हा नारीभाग्यम्! नयनाभ्यां प्रवहति मे अश्रुनिर्झरिणी, स्फुटति वक्षःस्थलम्। तथापि न प्रशाम्यति हृदयज्वाला।

धृतराष्ट्रः—अहो दहति माम्, दहति मां तापः। देवि, कथ्यताम्, अस्ति कोऽपि निस्तारोपायः?

गान्धारी—देव, निस्तारोऽस्ति केवलमधुना देहपातेन। तन्महाराज, किमतो राजहर्म्यवासविलासेन?

धृतराष्ट्रः—साधु साधु देवि। सम्यगभिहितं त्वया हितसाधनाय। तद्, गन्तव्यं तपसे वनमिति महामतेर्विदुरस्य हितवचनं स्मरामि।

[प्रविशति युधिष्ठिरः]

युधिष्ठिरः—जयतु कौरवेश्वरः।

धृतराष्ट्रः—आः क एष मम जयघोषमुदीरयति? भो नाहं राज्येश्वरः।

युधिष्ठिरः—तात, कुरुराज्येश्वर, एषोऽहं ज्येष्ठपाण्डवो भवद्दासो भवन्तमभिवादये।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

धृतराष्ट्रः—वर्द्धस्व धर्म्मनन्दन। तात पाण्डव, श्रूयताम्।

युधिष्ठिरः—आदिश्यतां चिरदासः।

धृतराष्ट्रः—कथयामि धीमन्। नहि नहि। एषा गान्धारनन्दिनी त्वां कथयिष्यति। (गान्धारीं प्रति) नृपनन्दिनि, कथ्यतामभिलाषः पाण्डवाय।

युधिष्ठिरः—(गान्धारीं प्रति) नमस्तेऽम्ब। (प्रणमति) देवि, कथ्यतां कृपया किं ते अनुशासनं परिजनेषु?

गान्धारी—वत्स, एष वानप्रस्थं कामयते शोकव्यथितो नरपतिः। अहमपि तदनुगमने समुत्सुका भवामि।

युधिष्ठिरः—देवि, कथमसहायाः पाण्डवाः परित्यज्यन्ते दुःखाय? एते वयं भवतीनां चिरस्नेहार्थिनः सेवका गुरुपादसेवनाय तिष्ठामः। परिजना वयम्। तद् युष्मच्चरणार्च्चनेषु को हि व्याघातः सञ्जातः?

गान्धारी—तात, न खलु विच्युतिः काऽपि दृष्टा भवतां गुरुजनविषयेषु। परं, सुखेन तिष्ठामो युष्माभिः परिषेविताः। किन्तु, कालोऽस्माकं परिपूर्णः। तद् धर्म्मार्थं वानप्रस्थसाधनम् अभिलषामः।

धृतराष्ट्रः—वत्स, वार्द्धक्ये आरण्यव्रतमेव कुरूणां साधनीयम्। तत् कुलधर्म्म-साधने अस्माकमानुकूल्यं विधीयताम्।

युधिष्ठिरः—अहो, कुलधर्म्मः। देव, तथापि प्रसीद पुत्रकेषु।

धृतराष्ट्रः—स्वस्ति स्वस्ति।

इति प्रथमाङ्के द्वितीयं दृश्यम्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तृतीयं दृश्यम्—अन्तःपुरम्

द्रौपदी—मातः, सुसम्पन्नमिदानीं माल्यार्घ्यरचनम्। तत् स्वाच्छन्द्येन विधीयतां पुण्यार्च्चनं सर्व्वेषां कल्याणाय।

कुन्ती—साधु द्रुपदनन्दिनि। एवं गतासि गृहलक्ष्मीगौरवं नारी-धर्म्म-पालनेन।

द्रौपदी—देवि, धन्यास्मि तव स्नेहाशीर्लाभेन। देवा मे प्रसीदन्तु यथा कुलधर्म्मं पालयामि।

[प्रविशति गान्धारी]

प्रविश्य गान्धारी—(कुन्तीं प्रति) भगिनि, मोदस्व सुचिरं सौभाग्यसम्पदा वत्सायाः पुण्यशीलेन। (द्रौपदीं निर्दिशति)

कुन्ती—आगच्छ महादेवि। एषाऽस्मत्कुलवधूरिन्द्राणीकल्पा मनोज्ञचरिताशेषगुणशालिनी सर्व्वथास्माकं सौख्यं वर्द्धयति। (द्रौपदीं प्रति) वत्से, वन्दस्व महादेवीम्।

[द्रौपदी उभयोः पादवन्दनां करोति]

गान्धारी—(द्रौपदीं प्रति) जाते, मोदस्व सुखसम्पदा। वर्द्धस्व वत्सैः सम्भाविता पुण्यशीलेन।

कुन्ती—तदहमपि देवि, वत्सानां कृते भवत्या आशिषं प्रार्थये।

गान्धारी—त्वमेव जानासि प्रिये, आ बाल्यात् पाण्डवा मे चिरस्नेहभाजनमानन्दस्थानञ्च प्राणानाम्। तत् सुचिरं कल्याणं कामये वत्सानाम्।

कुन्ती—धन्यास्मि। तद् देवि, आगम्यतामस्माभिः सार्द्धं भद्रकालीमन्दिरं मङ्गलार्च्चनाय। (द्रौपदीं प्रति) वत्से, अनुसर आवाम्।

गान्धारी—तथास्तु। (सर्व्वा मन्दिरमुपतिष्ठन्ते। कुन्ती देवीमर्च्चयति)

कुन्ती—(कृताञ्जलिः पुष्पाञ्जलिं निवेद्य प्रार्थयते)

ॐ भद्रकालि महामाये सर्व्वमङ्गलदायिनि।
कुरुकुलेश्वरि देवि, नमस्ते रक्ष नः सुतान्॥ (प्रणमति)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

[द्रौपदी गान्धारी च नमतः]

कुन्ती—(द्रौपदीं प्रति) वत्से, सुसम्पन्नं भगवत्या अर्च्चनम्। तदधुनाहं कुललक्ष्मीप्रतिमायां त्वयि नारीधर्म्मोचितं गार्हस्थ्यभारं समर्प्य वानप्रस्थ-साधनार्थमुद्युक्ता भवामि।

द्रौपदी—अम्ब, कथमशरणांस्तनयान् परिहरसि ? को नु मां त्वया विरहितां स्नेहमाङ्गल्येन परिपालयिष्यति ?

कुन्ती—जाते, मा दुःखं गच्छ। गतासि चिरं गृहलक्ष्मीगौरवं स्वकीय-स्नेहमधुर-पुण्यशीलेन। तेन निःशङ्कं देदीप्यस्व वत्सैर्धर्म्मपालनेन।

द्रौपदी—(गान्धारीं प्रति) महादेवि, मूर्त्तमाङ्गल्यव्रताऽस्तभवती. निवारयतु पाण्डवजननीमारण्यव्रतसङ्कल्पादस्माकं कल्याणाय।

गान्धारी—स्वस्ति, कल्याणि ! एषाहं कथयामि भगिनीम्। (कुन्तीं प्रति) भगिनि, विरम वानप्रस्थसाधनात्। अत्रैवावस्थाय रक्ष तनयानभय-माङ्गल्यदानेन।

कुन्ती—देवि, ममापि पूर्णतामेति कालः। तत् तपोवने भवत्याः पुण्य-सङ्गेन श्रेयःसाधनं मम ईप्सितम्। (द्रौपदीं प्रति) मास्तु दुःखं भद्रे ! वार्द्धक्ये आरण्य-धर्मसाधनमेव कुरूणां कुलव्रतम्। तत्, कुल-धर्म्मपालनेऽस्माकं सहाया भव। नूनं तपोवनेऽपि युष्माकं कल्याण-साधनमेव विधातव्यं मया स्वधर्म्मपालनेन।

द्रौपदी—मातर्वन्दे युष्मच्चरणयुगलम्। (वन्दते) पालयामि ते स्नेहानु-शासनम्। किन्तु भवत्या विच्छेदचिन्ता मां व्याकुलयति !

कुन्ती—(पृष्ठे करं सञ्चाल्य) अलं दुःखेन भद्रे ! निःशङ्का भव। देवा वो रक्षिष्यन्ति। (सस्नेहमाद्रियते)

गान्धारी—जयति देवी। (द्रौपदीं प्रति) वर्द्धस्व कल्याणि धर्म्मपालनेन।

द्रौपदी—अम्ब, अम्ब !

कुन्ती—(द्रौपदीं प्रति) शिवमस्तु। सुखिनी भव। एहि, प्रणमामः कुरुकुलेश्वरीं देवीं भद्रकालीं विघ्ननाशाय।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

[सर्व्वा युक्तकराः प्रणमन्ति]

ॐ सर्व्वमङ्गलमङ्गल्ये शिवे सर्व्वार्थसाधिके ।
शरण्ये त्र्यम्बके देवि नारायणि नमोऽस्तु ते ॥

(पटीक्षेपः)

इति प्रथमोऽङ्कः

द्वितीयोऽङ्कः—प्रथमं दृश्यम्

[द्वारकापुरी—श्रीकृष्णस्य प्रासादः—रत्नसिंहासनोपविष्टः श्रीकृष्णः करतले न्यस्तकपोलो विमनायमानस्तिष्ठति ।]

श्रीकृष्णः—(स्वगतम्) सुरम्यहर्म्यमालिनी कनकरत्नमयी द्वारका ! साम्प्रतमियं श्रीहीना आभाति । एषा निखिलसुषमाविमण्डितानन्तगुणमहिम्ना अमरावतीव शोभते । सा हि अचिरेणैव विलयं गमिष्यति । (उत्थाय परिक्रमन्) सृष्टिविलयो मम विधानम् । तद् विश्रान्तोऽहं मर्त्यलीलां परिहरिष्यामि । (पुनर्निवृत्य सिंहासने उपविशति) ।

[प्रविशति रुक्मिणीसहिता सत्यभामा]

प्रविश्य रुक्मिणी—विजयतां द्वारकेशः ।

,, सत्यभामा—जयतु द्वारकानाथः ।

उत्थाय श्रीकृष्णः (उभयं प्रति)—स्वागतं प्रियाणाम् । देव्यः, भवतीनामागमनमहं प्रतिपालयामि । तद् अलंक्रियतामासनद्वयमानन्देन ।

[समादरं प्रदर्शयति—उभे चोपविशतः]

रुक्मिणी—जयतु यदुनाथः । इत्थं विजयते खलु महनीयचरितस्य गौरवम् ।

सत्यभामा—तद्धि राज्येश्वरस्य प्रसादमूलम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

श्रीकृष्णः (सहर्षम्)—विजयन्तां महादेव्यः। (उभयं प्रति) देवि रुक्मिणि, प्रिये सत्यभामे, साक्षात् श्रियः खलु भवत्यः। तत् मूर्त्तिमतीः मङ्गलविग्रहाः युष्मान् संवर्धयामि।

सत्यभामा—अहो भाग्यम्।

रुक्मिणी—विजयते खलु राजराजेन्द्राणां माहात्म्यम्। वयं तु महतां कृपाधन्याः।

श्रीकृष्णः—साधु साधु।

सत्यभामा—(सकौतुकम्) तद् वन्दे यादवेश्वरस्य पादपद्मम् (वन्दते)।

रुक्मिणी—अहमपि नो हृदयेश्वरं प्रणमामि। (सहर्षं नमति)।

श्रीकृष्णः—(सानन्दम्) उत्तमम्, उत्तमम्। यातु—प्रियतमे सत्यभामे, महादेवि प्रिये रुक्मिणि,—अधुना वः कथयामि।

रुक्मिणी सत्यभामे—अनुगृह्यतां निदेशेन।

श्रीकृष्णः—देव्यः, अस्ति किञ्चिद् गूढवक्तव्यम्। तत् सुशान्तमनसा श्रोतव्यम्।

सत्यभामा—कथयतु नाथः।

रुक्मिणी—वयं सश्रद्धमाकर्णयिष्यामः। तद् अपनयतु प्रिय, अस्मत्कौतूहलं हित-वचनेन।

श्रीकृष्णः—महादेव्यः, साम्प्रतमहं प्रभासतीर्थं गमिष्यामि।

रुक्मिणी-सत्यभामे—(सहर्षम्) अहो भाग्यम्! वयं पुण्यसञ्चयं करिष्यामः।

श्रीकृष्णः—(सविषादम्) देव्यः, न तत्रेदानीं भवतीनां गमनेन प्रयोजनम्। प्रयोजनवशादहं गच्छामि। यूयमत्रावस्थाय परिजनानां प्रजानाञ्च सौख्यविधानं कुरुत।

सत्यभामा—कथं तत् सम्भवति? सुधाकरविहीने नभसि कः खलु किरणं विकिरिष्यति?

रुक्मिणी—(सविषादम्) न जाने, को हि विपर्य्ययः समुपतिष्ठते इति। तद् यादव, अपनयास्माकं कौतूहलं संशयं च हितवचनेन।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

श्रीकृष्णः—साधु देव्यः! विजयत। सत्यं वः कथयामि। यूयं हि मम सुचिरं विप्रहांशभूता, जगत्त्राणाय मर्त्ये मामुपागताः। अधुनास्माकं लीलापरिहारकालः समागच्छति। अचिरेणैव विधिविधानाद् यादवाः क्षयं गमिष्यन्ति। भवेच्च द्वारकापुर्य्या विलयः।

रुक्मिणी सत्यभामे—(सविषादम्) अहो, दुःखम्! शोचनीयः खल्वयं सन्देशः!

श्रीकृष्णः—(सान्त्वनास्वरेण) माऽस्तु खेदो देव्यः। अवश्यम्भाविनि भवितव्ये न खलु दुःखं समुचितम्। तस्य च हेतुभूतानि निमित्तानि साम्प्रतमुपस्थितानि। मद्वंशीयानामधर्माचरणेनात्मकलहोऽधुना तेषां क्षयाय भविष्यति। अहमपि दूरतो मे नरलीलाया अवसानं सङ्घटयिष्यामि।

रुक्मिणी सत्यभामे—(आर्त्तकण्ठेन) प्रियतम—प्रियतम!

श्रीकृष्णः—अलं दुःखेन। देहान्ते च संप्राप्त-दिव्यतनुभिर्युष्माभिरवश्यमेव भविता मे शुभसङ्गतिः।

रुक्मिणी सत्यभामे—(सविषादम्) अहो, असहनीयो विच्छेदः!

श्रीकृष्णः—नहि नहि। सत्यं वो वदामि। न कदापि अन्यथा भविष्यत्यस्माकं मेलनम्। तत् प्रतीक्ष्यतां कालोऽस्मत्शाश्वतसङ्गसौख्याय।

सत्यभामा—हा नारीभाग्यम्!

श्रीकृष्णः—प्रियतमाः, भवतीभ्यः सुचिराय मे हृदयं प्रदत्तम्। तन्नाहं सत्यम् अपलपिष्यामि।

सत्यभामा—तथास्तु। किन्तु नाथ, अस्ति नः किञ्चित् प्रार्थनीयम्। तेन अनुमतिं ते प्रार्थयामहे।

रुक्मिणी—शाश्वतकल्याणायास्माकं देवार्चनस्वस्त्ययनादिकं काम्यते।

श्रीकृष्णः—उत्तमम्। विधीयतां दानधर्मयज्ञादिकं प्रफुल्लचित्तेन। तद्धि शुभाय भविष्यति।

सत्यभामा—नाथ, इच्छामि लक्षब्राह्मणार्चनं पुण्यलाभाय ईप्सितसिद्धये च।

श्रीकृष्णः—अहो सुखम्! पूर्णोऽस्तु युष्माकं मनोरथः शुभानुष्ठानेन।

रुक्मिणी सत्यभामे—(श्रीकृष्णस्यपादयोः पतित्वा) प्रिय प्रिय।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

[[दूरे नारदो गायति]]

गानम्

नेपथ्ये नारदः—वृन्दावनचारण, विश्वविमोहन, वसुधाहृदिरञ्जन,
निखिलजीवन, माधव जय, नन्दनवनचारण ।
जयतु मुरारिः कलवेणुधारी
द्वारकेशो गोलोकविहारी
मनोहारी, तिमिरविदारो, विलसतु कंसघातनः ॥
प्रसीद मयि कृष्णकेशव पद्मपलाश लोचन ।
चिन्मय जय करुणामय भक्तहृदयनन्दन ॥

श्रीकृष्णः—(भार्य्याद्वयमुद्दिश्य) देव्यः, देवर्षिरत्रागच्छति । नूनं शुभङ्करोऽयं महाजनसमागमः । स हि प्राकाम्येन मङ्गलं विधास्यति ।

रुक्मिणी-सत्यभामे—(सहर्षम्) वयं देवर्षेश्चरणवन्दनं करिष्यामः ।

[प्रविशति वीणाकरो गायन् देवर्षिर्नारदः । रुक्मिणीसत्यभामे कृताञ्जली महर्षिमभ्यर्थयेते]]

उभे—जयति जयति देवर्षिः !

श्रीकृष्णः—(उत्थाय समुपसृत्य सादरम्) स्वागतं देवर्षे ! हृष्यामि भवतां पुण्यसमागमेन । तद् अलंक्रियतामिह रत्नासनं निजगुणेन ।

नारदः—अहो सुखम् । आनन्दः—आनन्दः ।

श्रीकृष्णः—(पत्नीद्वयं प्रति) आनीयतां देव्यः, देवर्षेः पूजनार्थमर्घ्यसम्भारः ।

रुक्मिणी-सत्यभामे—अहो भाग्यम् ! अहो भाग्यम् !

[अभ्यन्तरं गत्वा स्वर्णपात्रस्थमर्घ्यादिकमुपानीय देवर्षेश्चरणयोरुपहरतः वन्देते च महामुनिम् ।]

—नमोऽस्तु देवर्षये ।

नारदः—स्वस्ति स्वस्ति । (अर्घ्यं गृह्णाति) नारायणोऽत्रभवतीनां मनोरथं पूरयतु ।

रुक्मिणी-सत्यभामे—विजयतां दिव्यतापसः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नारदः—नारायणः, नारायणः। जयति मधुसूदनः।

श्रीकृष्णः—(नारदं प्रति) देवर्षे, आगमनं ते मनसा प्रतिपालयामि। अधुना लीलापरिहारात् प्राक् प्रेमसिद्धं महात्मानं त्वां सम्प्राप्य तृप्यामि।

नारदः—जयति लक्ष्मीकान्तः। द्वारकेश, अचिन्तनीयस्ते लीलामहिमा मामाकर्षति। तेन ते भुवनमङ्गल-नरविग्रह-दर्शनेनाहं कृतार्थः सञ्जातः।

श्रीकृष्णः—अलं विनयेन। किन्तु देवर्षे, अपरिशोधनीयस्ते प्रेमानुग्रहोऽनुक्षणं मामानन्दयति। इत्थं सर्वथा विजयते हि त्वदीया त्रिलोकदुर्लभा प्रेमभक्तिर्जगतां कल्याणाय।

नारदः—लीलामय, अपार्थिवं ते लीलाचातुर्य्यं मनो हरति। तव प्रसादेनाहं गतसंशयो मोहमुक्तोऽस्मि। तद् वन्दे त्वामानन्देन। (वन्दते)

श्रीकृष्णः—(उत्थाय करे धृत्वा हसन्) भो भक्तचूडामणे, एवमपार्थिवप्रेमसम्पदा त्वं विजयसे। तेन च धन्योऽहं भक्तसङ्गलाभेन। तत् कथ्यतां किं ते प्रियं करोमि ?

नारदः—(सगदगदम्) विजयतां भक्तवत्सलः। सर्वकालेषु यथा ते लीलासङ्गी भवामीति प्रार्थये।

श्रीकृष्णः—तथास्तु। लोकपावनी ते प्रेमभक्तिश्चिरं मां बध्नाति। तेन नाहं त्वां परिहरामि।

नारदः—अहो, धन्योऽस्मि। (रुक्मिणीसत्यभामे समुद्दिश्य) तन्महादेवि रुक्मिणि, कृष्णप्राणवल्लभे सत्यभामे च, यूयमपि देवदुर्लभ-पातिव्रत्य-माहात्म्येन त्रिलोकपतिं जनार्दनमनुगताः सुचिरं सङ्गसौख्येन मोदध्वम्।

[प्रस्थानार्थमुत्तिष्ठति, पश्यति च प्रेमोत्फुल्लनयनेन रुक्मिणी-सत्यभामा-समेतं वासुदेवामानन्देन।]

नारदः—जय जनार्दन—जय मधुसूदन।

रुक्मिणी-सत्यभामे—विजयतां देवर्षिः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

[नारदो गायन् प्रस्थानं करोति]

गानम्

तमसः पारे ज्योतिर्म्मयः कलुषतिमिरहारी,

भक्तहृदयरञ्जनहरिर्जयतु मनोहारी ।

प्रेममय श्रीमाधव

कमलेश जय केशव

युगयुगान्त-लीलामयतनु-मोहनमूर्त्तिधारी ।

जयतु वैकुण्ठविहारी ॥

इति द्वितीयेऽङ्के प्रथमं दृश्यम् ।

द्वितीयं दृश्यम्

[द्वारका-राजपथे पानमत्ता यादवा आनन्देन कोलाहलं कुर्वन्ति—
नृत्यन्ति, गायन्ति च । अग्रतो गच्छति च नारीवेशः शाम्बः ।]

[यादवानां गानम्]

कुरुत कुरुत सुखगानम् ,

नृत्यकेलिपरा कुरुत मधुपानम् ।

प्रथमयादवः— अयमेति मधुमासः,

द्वितीययादवः— विकशतु मुखहासः—

तृतीययादवः— स्फुरति हृदये मुहु रसविलासः—

सर्वे— अधरे अधरे, नयने नयने कुरुत सुधादानम् ,

आनन्दनिर्झरस्नानम् ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

[प्रविशन्ति नारदपुरःसरास्तपोधनाः]

प्रविश्यादूरतो नारदः—(तपस्विगणं प्रति) अब्रह्मण्यम्, अब्रह्मण्यम्। एते यादवाः कालप्रेरिता इव प्रमत्ता उल्लसन्ति। अहो केशव, केशव!

[यादवास्तपस्विनो विलोक्य सदम्भमुल्लासेन तानाह्वयन्ति]

यादवाः—भो भोस्तपस्विनः! आगच्छत, आगच्छत। कुरुतपानोत्सवम्।

नारदाद्याः—नारायणः, नारायणः। (ऊर्द्ध्वं निरीक्ष्य) केशव, रक्ष भुवनम्।

प्रथमयादवः—(उपसृत्य) कथं नालपथ? अरसिका यूयम्।

द्वितीययादवः—एत महाभागाः। अत्रानन्दोत्सवे सम्मिल्य सुखं कुरुत।

नारदाद्याः—नारायणः—नारायणः!

तृतीययादवः—भो भोः! पिबत, खादत। कुरुत नृत्यम्।

सर्वे यादवाः—मधुरम्—मधुरम्—अहो सुखम्! (सानन्दं नृत्यन्ति)

नारदाद्याः—नारायणः — नारायणः!

प्रथमयादवः—(उपगम्य) गच्छतु तावत्। भोस्तपोधनाः, सर्वज्ञाः खलु भवन्तः। (नारीवेशिनं शाम्बं निर्दिश्य कथयन्ति) अत उच्यतां केवलमस्मत्कौतूहलनिवारणाय किमेषास्माकं सहचरी प्रसविष्यते पुत्रं कन्यकां वेति।

यादवाः—(हसन्तः) साधु—साधु!

नारदः—(विरक्तः) एष मूषलं प्रसविष्यते। भविता च तेन युष्माकं संहारः!

प्रथमयादवः—(पानेन स्खलितवचनः) किं कथयन्ति भवन्तः? मूषलं जनयिष्यति सहचरी?

अन्ये—(मदविह्वलाः) आनन्दः आनन्दः। मूषलं जनिष्यते। अहो मूषलम्!

नारदः—अथ किम्। छद्मवेशिनोऽस्य उदरात् मूषलं समुद्भूय सर्वान् संहरिष्यति। (द्रुतं स्थानं परित्यजन्ति नारदाद्याः।)

यादवाः—(उच्चैरुपहसन्ति) हाः—हाः—हाः! पलायन्ते तापसाः! (उल्लसन्ति)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रथमयादवः—चलत चलत सखायः। मूढ़ाः खलु तपस्विनः किमपि न जानन्ति।

सर्वे—आनन्दः—आनन्दः। प्रचलत प्रचलत। रे रे! चलत चलत। (सोल्लासं प्रस्थानं कुर्वन्ति।)

[नेपथ्ये वज्रनादः—दूरागतः प्रचण्डजलकल्लोलरवः—ध्वनति च दूरतः सकरुणं विषादवीणा]

इति द्वितीयाङ्के द्वितीयं दृश्यम्

तृतीयं दृश्यम्

[श्रीहीना शून्या द्वारका—दूरे शिवारुतपेचकशब्दसंमिश्रो झटिकारवः]

[नेपथ्ये पुरलक्ष्मीर्गायति विषादगानम्]

गानम्

अन्धकारे शून्यपुरे ध्वनति दुःखवीणा,
क्रन्दति मौनं जनहीना नगरी विषाददीना।
शोचन्ति जना हा केशवेति
यदुनाथ कृष्ण यादवेति
गर्ज्जति मत्तः प्रलयसिन्धुर्दिग्वधूः शोकलीना॥
प्रसरति घोरतिमिरः पुरः आलोकहरणकारी,
मज्जति पुरी अतललीना नास्ति तिमिरहारी,—
नीरवा विहगकण्ठगीतिः
स्तब्धा शङ्खनादस्तुतिः
न चरति पुरकामिनीगणो वसुधा प्राणहीना।
क्रन्दति मधुवीणा॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

[ततः प्रविशति दारुकपुरःसरोऽर्जुनः]

प्रविश्यार्जुनः—(दारुकं प्रति) धीमन्, कथ्यतामतः कथं परित्यजति कनक-द्वारकां तत्रभगवान् श्रीयदुकुलनाथ इति ।

दारुकः—(सविषादम्) किं कथयामि प्रिय ? अधर्मोन्मत्तानां यादवानां विनाशोऽवश्यम्भावीति विज्ञाय प्रभासं प्रस्थितः सपरिगणो भगवान् मधुसूदनः ।

अर्जुनः—(विषण्णः) अहो, शशाङ्कविहीना यामिनीव प्रतिभाति सर्वम् । तेन प्राणहीनामिव श्रीविहीनां शून्यनगरीं पश्यामि । (सोच्छ्वासम्) अहो, खप्नमयी यादवराजधानी !

दारुकः—किं वक्ष्यामि प्रिय ? अद्य नैव श्रूयन्ते पुष्पवनेषु मधुकर-कोकिल-गुञ्जितानि । न क्वापि ध्वनति शङ्खनादो मङ्गलवीणा वा । विरमन्ति च विप्रकण्ठोदीरिता उदात्तगम्भीरा वेदपाठाः ।

अर्जुनः—(निःश्वस्य करुणम्) अहो, अस्तं गतो यदुकुलचन्द्रमाः । स हि भूतभावनो विश्वप्राणानन्दविग्रहो विलयं गच्छति स्वकीयविधानेन । तेनात्र न स्फुरति कुत्रापि प्राणानां स्पन्दनम् !

दारुकः—अथ किम् । सर्वशक्तिं बिभ्राणोऽपि करुणामयो भगवान् शोक-विह्वलायास्तत्रभवत्याः कौरवजनन्या अभिशापमनुस्मरन् कुलक्षयदर्शनं परिहर्तुकामः प्रभासमुपगतो लीलां परिजहार । रौहिणेयः, सपत्नीको वसुदेवः श्रीकृष्णभामिन्यश्च योगरता यादवाननु चिराय दिवं गताः ।

अर्जुनः—(सखेदम्) अहो वासुदेवः, प्रियसखः केशवः ! अधुना मुरारिसङ्ग-विहीना वयं कथं जीवामः ?

दारुकः—(स्वगतम्) कृष्णविरहितं जीवनं विडम्बनमेव । (प्रकाशम्) धनञ्जय, विरहखिन्ना वयम् । तथापि वासुदेवोपदिष्टं कथयामः । लीला-परिहारात् प्राग् भगवताहं समादिष्टो यदुपतिना यत् समागतायात्र-भवते विदेह-स्वजनानां सद्गतिविधानार्थमन्त्यकृत्यसम्पादनाय भगवन्नियोगं ज्ञापयेति ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अर्जुनः—(सोच्छ्वासम्) बन्धूनामुदककृत्यानि सम्पादयिष्यामि। (ऊर्द्ध्वं विलोक्य) ते हि देहबन्धमुक्ताः स्वर्गतिं लभन्ताम्।

दारुकः—तदेव आयोज्यताम्।

अर्जुनः—साधु! विजयेतां रामकृष्णौ। तदचिरेण बन्धुकृत्यं समाप्य स्वस्थानं प्रत्यावर्तिष्ये।

दारुकः—तथास्तु। ततश्च भगवदादेश-पालनार्थमवशिष्टक्षत्रवीराः सहपुरकामिनी-वर्गा यादवाः शिशुवृद्धसमेता अन्यत्र योग्यस्थानेषु प्रतिष्ठापनीयाः।

अर्ज्जुनः—नूनमवशिष्टान् यदुवंशीयांस्तथा पुरयोषितश्च रक्षिष्यामि। तत् प्रिय, विधीयतां पौराणां प्रास्थानिकमायोजनमचिरेण।

दारुकः—(निःश्वस्य) तदेव भविष्यति! एषोऽहमुद्युक्तो भवामि। किन्तु हन्त! (स्वगतम्) क्षणेनैव अस्माकं प्रस्थानात् परं सिन्धुतलेषु विलयं गमिष्यति यादवपुरी द्वारका।

अर्जुनः—वीरधानी द्वारका! अहो, केशवप्रियभूमिर्द्वारका विलयं गच्छति!

[नेपथ्ये विपुलजलकल्लोलः—समुद्रोच्छ्वासो ध्वनति]

इति द्वितीयाङ्के तृतीयं दृश्यम्

समाप्तो द्वितीयोऽङ्कः।

तृतीयोऽङ्कः—प्रथमं दृश्यम्

[हस्तिनापुरप्रासादः—बहिःकक्षे युधिष्ठिरो विमनायमानः सञ्चरति।]

युधिष्ठिरः—(स्वगतम्)अहो कष्टम्! धनञ्जयोऽद्यापि न प्रत्यागच्छति। न जाने, द्वारकायाः का वार्तेति। (गत्वा सिंहासने उपविशति) अथ वासुदेवस्य संवादं विज्ञातुं मनो मे व्याकुलीभवति!

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By SIddhanta eGangotri Gyaan Kosha

[प्रविशति दारुकः]

(प्रविश्य) दारुकः—जयतु धर्मनन्दनः। राजन्, एषोऽहमागच्छामि।

युधिष्ठिरः—(ससम्भ्रममुत्थायाभ्यर्थयते) अहो दारुक! आगम्यतां प्रियबन्धो। कथय वार्त्ताम्।

[दारुको मौनं तिष्ठति—अधोमुख उच्छ्वसिति]

युधिष्ठिरः—कथ्यतां दारुक, किं कुशलं वर्तते केशवस्येति। द्वारकायाः शुभ-सन्देशं कथयित्वा प्रशमय मम उद्वेगम्।

दारुकः—महाराज! (इत्युक्त्वा बाष्परुद्धकण्ठो विरमति)

युधिष्ठिरः—(सोत्कण्ठः) उच्यतां प्रिय अकपटं सर्ववृत्तान्तः।

[प्रविशति विषण्णमूर्तिरर्जुनः]

(प्रविश्य) अर्जुनः—आर्य! वन्दे भगवन्तम्।

युधिष्ठिरः—एह्येहि प्रिय। युष्मत्प्रतीक्षयाहं व्याकुलः क्षणं प्रतिपालयामि। तद् आगच्छ। उपविश। कथय सर्वम्।

[अर्जुनस्तूष्णीं तिष्ठति]

युधिष्ठिरः—(सोद्वेगमुत्थाय भ्रातरं करे धृत्वा) धनञ्जय, कथं तूष्णीं तिष्ठसि? कथय प्रिय, वासुदेवस्य वृत्तान्तम्।

अर्जुनः—(सोच्छ्वासम्) आर्य, दारुकस्त्वां सर्वं कथयिष्यति।

[युधिष्ठिरो विस्मयविह्वलो दारुकं निरीक्षते]

दारुकः—(युधिष्ठिरं प्रति) धर्मराज, किं वक्ष्यामि? नास्ति केशवः।

युधिष्ठिरः—(सोद्वेगम् उच्चैः) नास्ति केशवः?

दारुकः—अथ किम्? (स्खलितकण्ठः) स हि निखिलबान्धवो विश्वात्मा लीलां परिहाय मर्त्यं त्यजति!

युधिष्ठिरः—(सिंहासनाद् भूतले पतितः शोकविह्वलकण्ठः) वासुदेवो मर्त्यं त्यजति? (खिन्नकण्ठः) अहो हन्त, सर्वमद्य शून्यं पश्यामि!

[दारुकार्जुनौ सत्वरं धर्मराजं सयत्नमुत्तोल्य सिंहासने स्थापयतः]

दारुकार्जुनौ—धैर्यमवलम्बस्व धीमन्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

युधिष्ठिरः—अहो केशव !

दारुकः—मतिमन् , तत्त्वज्ञो भवान् विवेकी सर्ववेत्ता च । अतः किं वक्ष्यामः ? विधृत्य चात्मानं शमयतु विषादं स्वभावगुणेन ।

युधिष्ठिरः—कथय प्रिय, सर्वमाकर्णयामि ।

दारुकः—राजन् , धनञ्जयोऽपि विषादविह्वलः । अतोऽहं सर्वं कथयामि ।

युधिष्ठिरः—कथय प्रिय, उत्सुकोऽस्मि श्रोतुमानुपूर्व्येण ।

दारुकः—धर्मनन्दन, अचिन्त्यनीयं हि दैवविधानम् । मतिभ्रमात् प्रमत्ता यादवा दुराचरणकलुषिता मुनिभिरभिशप्ताः । ते हि प्रकाशं भोग-विलासपरायणा अधर्माभिभूता श्रद्धार्हान् अवमानयन्ति ।

युधिष्ठिरः—अहो पापम् !

अर्जुनः—तेषां पापताण्डवद्वारका शान्तिहीना परस्परकलहेन विनाशपथ-मुपगता ।

दारुकः—तदा हि वासुदेवो विलसितेषु दुर्लक्षणेषु महादेव्या गान्धार्या अभिशापवाणीं स्मरन् , प्रत्यासन्नकुलक्षयमवगम्य परिजनैः सह प्रभास-तीर्थं प्रस्थितः ।

अर्जुनः—प्रस्थिते च यदुनाथे, तदुपदेशाद् वसुदेवसहिताः श्रीकृष्णभार्य्या द्वारकायां ध्यानयोगपरायणा व्रतमाश्रित्यावस्थिताः ।

युधिष्ठिरः—अहो कष्टम् ! ततस्ततः ?

दारुकः—ततश्च प्रभासेऽपि अधर्मेण नृत्यगीतमदिरोत्सवविह्वला यादवाः काल-प्रेरिता इव परस्परं मुषलेनाक्रम्य विनाशं जग्मुः ।

युधिष्ठिरः—(सखेदम्) अहो, यदुकुलं निःशेषं क्षयमुपगतम् !

अर्जुनः—ततश्चाकर्णयतु शेषवृत्तान्तम् ।

दारुकः—तदा च महावीरो रौहिणेयः कुलक्षयदर्शनेन व्यथित आत्मनश्च महाप्रयाणकालं विज्ञाय योगेन तनुं तत्याज ।

युधिष्ठिरः—अहो, वीरोत्तमो हलधरो भगवान् अनन्तः !

दारुकः—ततश्च महाराज ! (स्खलितवाक् मौनं तिष्ठति)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

युधिष्ठिरः—कथ्यतां प्रिय, परिणामवृत्तान्तश्रवणाय व्याकुलस्तिष्ठामि।

दारुकः—व्यथितोऽस्मि महाराज, अनुवृत्तं कथयितुम्। तथापि कथयामि।

प्रस्थिते च रेवतीकान्ते श्रीभगवान् महाप्रयाणेप्सुर्योगेन शेषशयनमाश्रितः।

युधिष्ठिरः—(शोकविह्वलः) कथं कथं हि, भूतभावनस्य विश्वपतेरुत्क्रमणम्?

दारुकः—श्रूयतां मतिमन्, तदा हि विहगोऽयमिति भ्रान्त्या जराख्यनिषादेन योगाविष्टः श्रीभगवान् सुतीक्ष्णसायकेन पादकमले संविद्धः। स हि सर्वज्ञो विभुर्भगवान् करुणापारावारः पीताम्बरश्चतुर्भुजमनोहरमूर्तिधरो देवगन्धर्वमहर्षिगण-संस्तुतः स्वकीयालौकिकोज्ज्वल-प्रभापुञ्जेन दिङ्मण्डल-मुद्भासयन् सुरलोकाय प्रतस्थे।

युधिष्ठिरः—स हि योगेश्वरो विश्वात्मा वासुदेवः। (सोच्छ्वासं विलपति) (क्षणेनात्मानं संयम्य) अहो, अचिन्तनीयो भगवन्महिमा! (खिन्नकण्ठः) ततश्च?

दारुकः—ततश्च राजन्, पूर्वादिष्टः केशववचनाद् द्वारकामागम्य मया श्रीभगवत आदेशः प्रतिपालितः।

अर्जुनः—मयापि श्रीहीनां शून्यां द्वारकामुपस्थाय महात्मनोऽस्य श्रीमुखात् केशवस्यान्तिमोपदेश आकर्णितः। तेन महागुरोर्मातुलवसुदेवस्य सकाशं गत्वा विषादखिन्नं तं कृष्णकामिन्यश्च समाश्वासयम्।

युधिष्ठिरः—अहो ततस्ततः?

अर्जुनः—ततश्च योगेन त्यक्तकलेवरे सपरिजने यदुवृद्धे, तपसा दिवं प्रस्थितासु च पतिध्यानपरासु रुक्मिणीसत्यभामादिकृष्णभामिनीषु, सम्पादितं मया दिव्यधामगतानामन्त्येष्टिकृत्यादिकम्।

दारुकः—ततश्चावशिष्टान् सहनारीजनान् यदुवंशीयान् संनीय प्रस्थितेषु अस्मासु, संप्लाविता कनकहर्म्यमालिनी द्वारका सिन्धुसलिलेन।

युधिष्ठिरः—(निःश्वस्य) अहो, फलितस्तावत् कौरवमातुरभिसम्पातः! येन सर्वशक्तिमानपि भगवान् सतीशिरोमणेरभिशापं शिरोधार्यं कृत्वा धर्मार्थं कुलक्षयं स्वीकरोति!

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अर्जुनः—अहमपि, आर्य, वासुदेवविहीनो निःशक्तिः सञ्जातः। तेन पथि दस्युभिराक्रान्तं रमणीकुलं रक्षितुमसमर्थो हृतावशिष्ट-यदुरमणी-समेतान् क्षत्रियान् इन्द्रप्रस्थं समानीयात्र आगच्छामि। प्रद्युम्नतनयं वज्रं च तत्र सिंहासने समारोप्य प्रत्यागच्छामि।

युधिष्ठिरः—अलं शोकेन प्रिय, पश्य—कालो हि बलवत्तरः। स हि भगवद्विधानमनुगच्छति। तेन सर्वशक्तिमान् योगेश्वरो वासुदेवः सृष्टि-स्थितिविलयाख्यां लीलां करोति। नात्र अस्माकं प्रतीकारोपायः।

अर्जुनः—(सविषादम्) एभिर्विपर्ययैर्विमूढोऽस्मि देव। अहो प्राणानन्दं श्रीकृष्णमपश्यन् सर्वमहं तिमिराच्छन्नं पश्यामि! सर्वं मयि शून्यमा-भाति।

दारुकः—अधुना कर्तव्यमुपदिश्यतां महाराज, नियोज्यतां च धनञ्जयः पुण्यकृत्येषु विषादप्रशमाय।

युधिष्ठिरः—जयतु धर्मज्ञः। (दारुकार्जुनौ समुद्दिश्य) तद् धनञ्जय, अधुना वसुदेवसहितानां सपरिजनरामकृष्णादीनामुद्देशतः उदकदानपूर्वकं श्राद्धा-दिकमनुष्ठेयम्। तेन, नारद-द्वैपायन-भरद्वाजादीनामामन्त्रणं विधाय ब्राह्मणभोजन-कनकवस्त्रगवादिदानानि आयोज्यन्ताम्।

अर्जुनः—जयति धर्मराजः। बन्धूनां कृते कर्तव्यमाचरामः।

दारुकः—विजयतां धर्मनन्दनः।

[उभौ प्रस्थानं कुरुतः]

युधिष्ठिरः—(स्वगतम्) उत्तमम्। सर्वमधुना यथायथं समाप्यते। ततश्च आत्मनः शेषकृत्यम्। अतः किं पुनरनन्तरं राजहर्म्यवासविलासेन? तेन परीक्षिति समर्पितराज्यभारो निश्चिन्तः स्वच्छन्दचेतसा महाप्रस्थानाय प्रवर्तिष्ये।

इति तृतीयाङ्के प्रथमं दृश्यम्

समाप्तस्तृतीयोऽङ्कः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

चतुर्थोऽङ्कः—प्रथमं दृश्यम्

(हस्तिनापुर-राजपथः)

[उत्सववेशसज्जिता पुरी—उभयतः कदलीतोरणमङ्गलघटाद्यलङ्कृता हर्म्यमालाः—विद्यन्ते च पथि श्रेणिशः सुसज्जितगजाश्वरथादीनि सैनिकाश्च—नेपथ्ये मङ्गलशङ्खा ध्वनन्ति]

[प्रविशति वैदेशिकः]

प्रविश्य वैदेशिकः सुलोचनः—अहो, उपस्थितोऽस्मि कुरुराजधानीम्। किन्तु बन्धुर्विनोदः पृष्ठतस्तिष्ठति। श्रान्तश्चाहम्। तेनात्र विश्रामशिलायामुपविशामि। (पथिपार्श्वे शिलायामुपविशति)

[प्रविशति विनोदः]

प्रविश्य विनोदः—अरे मां पृष्ठतो विहाय आगच्छसि ? अनुसृत्य त्वां क्लान्तो भवामि।

सुलोचनः—आगच्छ बन्धो, अहमपि परिक्लान्तः। तदिह विश्रामशिलायामुपविश्य क्रियतां सुखेन श्रमापनोदनम्। (श्रमं नाटयति)

विनोदः—(उपविशति) भ्रातः, सुसमृद्धमेतद् राज्यम्। ननु शासति महीं धर्मनन्दने, प्रजानां सुखसमृद्धिः कुरुवीराणां महत्त्वं सूचयति। अतो नितरां धन्योऽस्ति धर्मपालो युधिष्ठिरः।

सुलोचनः—स हि पुण्यात्मा धर्मनन्दनो राजर्षिः पूर्वपुरुषाणां पुण्यचरितमनुपालयति। अतो विलसति सर्वतस्तस्य गुणमहिमा कीर्तिगौरवेण।

विनोदः—अथ किम्। पुण्यश्लोकः सोऽयं मुमुक्षुः सर्वसौख्यविलासं परिहाय पौत्राय सिंहासनमर्पयति।

सुलोचनः—धन्योऽस्ति धर्मराजो युधिष्ठिरः। सहि अक्षयां कीर्तिं प्रतनोति।

विनोदः—साधु युधिष्ठिरः। जयति महात्मा गौरवेण।

सुलोचनः—यातु, पथिपृत्सववसज्जां निरीक्ष्य कृतार्थो भवामि। अहो,

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मनोहारिणीयं नगरशोभा नयनमानसं सार्थकयति। किन्तु सखे, दीप्यते मे जठरानलः। स हि आहुतिमिच्छति।

विनोदः—अरे, सत्यमिदम्। तदग्रे उत्सवप्रसङ्गेनायोजितं भोजनमण्डपमुपगम्य फलमूलादिकं मिष्टद्रव्यं किञ्चिद् याचितव्यम्।

सुलोचनः—साध साधु!

[प्रविशति दधिविक्रेता]

प्रविश्य दधिविक्रेता—(उच्चैः) दधि—सुमिष्टं दधि!

सुलोचनः—(सहर्षम्) अहो, भाग्यम्! दधिकमास्वादयामि! (दधिविक्रेतारं प्रति) भो दधिविक्रेतः, आगच्छ आगच्छ। दधिकं क्रीणामि।

दधिविक्रेता—उत्तमम्। ददामि उत्तमद्रव्यं महाभाग!

विनोदः—अहो मधुरम्—मधुरम्। जीवितोऽस्मि तव दर्शनलाभेन।

दधिविक्रेता—नमो महात्मभ्यः। तदस्ति मे विक्रयार्थं विविधं दधिजातम्। अतः किंविधमिष्यते भवद्भिः?

सुलोचनः—किं किमस्ति, उल्लिख्यन्तां नामानि।

दधिविक्रेता—(गीतिस्वरेण)—मिष्टं दधि—अशर्करं दधि—अम्लं दधि—ततश्च शीतलं तक्रम्। अथ किं किं वः प्रयच्छामीति कथ्यताम्।

विनोदः—भो, दधिशर्करया प्रयोजनम्। तद् दीयतां भद्र मिष्टं दधिजातम्।

दधिविक्रेता—(पात्रभारं भुवि न्यस्य—उद्घाटयति पात्रमुखम्) साधु, साधु! विजयन्तां भवन्तः।

[प्रविशति मोदकविक्रेता—उच्चैर्घोषयति द्रव्यनामानि]

मोदकविक्रेता—मोदकः—क्षीरमोदकः—सुमिष्टं लड्डुकम्।

विनोदः—(सहर्षम्) अहो, मधुरं भोज्यजातं समुपस्थितम्। (सुलोचनं प्रति) बन्धो, सर्वसिद्धिकरी खलु अस्माकं शुभयात्रा। यतो दधि-मोदकसहितानि मिष्टद्रव्याणि सम्प्राप्तानि।

सुलोचनः—साधु, साधु। भाग्यं फलति सर्वत्र। (मोदकविक्रेतारं प्रति) भ्रातर्दीयतामावाभ्यां मिष्टजातम्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

विनोदः—(दधिजीविकं प्रति) भोः, उन्मोच्यतां ते दधिभाण्डम्। दीयतां च सशर्करदधिकं, पश्चाच्च तक्रमास्वादयामः।

सुलोचनः—साधु, साधु। दधिमोदकभोजनान्तें तक्रपानेन जठरं शीतलं भविष्यति। तच्च उत्तमं पानीयम्।

विनोदः—भोः, वैदेशिका वयं राज्याभिषेकोत्सवदर्शनार्थमागच्छामः। तद् दीयतां तूर्णमीप्सितं द्रव्यजातम्।

विक्रेतारौ (पृथक्पृथग् द्रव्यम् उपस्थापयतः)—साधु साधु। गृह्यन्तां द्रव्याणि महाभागः।

[विनोदसुलोचनौ तृप्त्या स्वादयतः]

विनोद-सुलोचनौ—अहो उत्तममुत्तमम्। तृप्ता भवामः। तदुच्यतां किं किं मूल्यार्थं दद्मः।

विक्रेतारौ—(सविनयम्) अलं मूल्यदानेन महाभागाः, अभ्यागता यूयम् अतिथिस्वरूपाः। अतोऽस्माभिः संवर्धनीयाः।

विनोदः—नहि—नहि। कथं सम्भवति तत्?

दधिविक्रेता—नाहं ग्रहीष्यामि मूल्यम्। अनेन नोऽतिथिसेवाऽस्तु।

मोदकविक्रेता—अहमपि माननीयान् वैदेशिकान् आनन्देन तोषयामि। एतदेवास्माकं द्रव्यमूल्यम्।

विनोदः—(उभावुद्दिश्य) अहो धन्या यूयम् औदार्यगुणेन। तद् धन्याः सन्ति नितरां हस्तिनापुरवासिनः। एतत् खलु स्मरणीयं भविष्यति।

सुलोचनः—भ्रातरौ, मुग्धा वयं युष्माकं महत्त्वेन। तथापि नोचितम् अस्माभिर्युष्माकं क्षतिसाधनम्। तद् गृह्यतां किञ्चिन्मूल्यरूपेण। (मुद्रादानाय करं प्रसारयति)

विक्रेतारौ—नहि—नहि। वयं तृप्ता भवामः। अतो गच्छामः स्वकार्याय। जयोऽस्तु महाभागानाम्। (प्रस्थानं कुरुतः)

(नेपथ्ये दधिविक्रेता)—दधि—सुमिष्टं दधि।

(नेपथ्ये मोदकविक्रेता)—मधुरो मोदकः—मोदकः। मोदकः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

विनोदः—अहो, सुशीलाः खलु कुरुराज्यवासिनः। प्रशंसनीयमेषां सौजन्यम्।

सुलोचनः—एतद्धि कुरुनृपतीनां सुशासनमाहात्म्यं प्रकटयति। तद् बन्धो, जठरं सन्तृप्तम्। अधुना उत्थीयतामुत्सवस्थानगमनाय।

विनोदः—एष उत्तिष्ठामि। (उत्थाय दण्डायमानः सर्वं पश्यन्)

—अहो, आनन्दमयी कुरुराजधानी विशालराजपथ-मनोरमपुरोद्यान-मण्डिता शोभते। मनोहरहर्म्यमालिनी ध्वजपताका-तोरणमङ्गल-घटान्विता विचित्रकुसुममाल्यालङ्कृतेयं महानगरी गुणमहिम्ना द्वारकामनुकरोति।

इति चतुर्थेऽङ्के प्रथमं दृश्यम्।

चतुर्थोऽङ्कः—द्वितीयं दृश्यम्

[हस्तिनापुरप्रासादे अभिषेकसभा]

युधिष्ठिरः—भो भोः सदस्याः, अद्याहमभिमन्युनन्दनं श्रीमत्परीक्षितं कुरु-सिंहासनेऽभिषेक्तुमिच्छामि।

सदस्याः—साधु साधु।

पुरोहितः—राजन्, सकलगुणाभिराम उत्तरासुतः स्वमहिम्ना विजयते। अतः समुचितोऽयं शुभसङ्कल्पः।

युधिष्ठिरः—ततश्चक्रवर्त्तिगुणोपेतोऽयंनो वंशधरोऽधुना राजमुकुटेन परिशोभताम्।

सदस्याः—वयं समर्थयामहे।

युधिष्ठिरः—अतो भवन्तः कुलपुरोहिताः शुभकर्म्मणि स्वस्तिवचनमुदीरयन्तु।

पुरोहितादयः—ॐ स्वस्ति स्वस्ति। अयमारम्भः शुभाय भवतु।

युधिष्ठिरः—भो महामान्याः सभासदः, समागता नृपाश्च, अत्रभवन्तः श्रीमदर्ज्जुनपौत्रं शुभाशिषा संवर्द्धयन्तु।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सदस्यादयः—वयमभिमन्युनन्दनं सानन्दं संवर्द्धयामः ।

युधिष्ठिरः—तथास्तु । (अर्ज्जुनं प्रति) धनञ्जय, अधुना तावद् उत्तराहृदय-रञ्जनं प्रियपौत्रं संवर्द्धय ।

अर्ज्जुनः—शिरोधार्य्य आर्य्यस्यादेशः । तद्धर्म्मनन्दनस्य कल्याणवचसाहं पौत्रमभिनन्दामि ।

युधिष्ठिरः—(परीक्षितः पुरो गत्वा) तात, विधातृप्रसादात् कुरुराजलक्ष्मी-स्त्वामद्य आश्रयते । तदिहानर्घ्यरत्नखचितं सिंहासनमलंकृत्य पालय प्रजावर्गं वीरधर्म्मगौरवेण । वर्द्धय च पितृपितामहादीनां कीर्त्तिविभवं महिम-गुणेन । गृहाण चैतद् राजमुकुटम् ।

[शिरसि मुकुटमर्पयति—ध्वनति च शङ्खः]

परीक्षित्—वन्दे आर्य्यपादम् । प्रणमामि पितामहम् । गुरून् अभिवादये । (गुरून् प्रणमति)

युधिष्ठिरः—नरपालोऽसि कुरुप्रवीर, धर्म्मव्रतो भव । सत्यशीलः प्रजा-पालनं कुरु । किं च दीनेषु दयाप्रदर्शनेन, दुष्टानां दमनेन, शिष्टानां च पालनेन सुखी भव । गुणिभ्यो मानं यच्छ, संरक्ष चार्त्तान्, पालय च परम्पराचरितं कुलधर्म्ममम्लानगौरवेण ।

अर्ज्जुनः—(उपगम्य) कुलमणे, शौर्य्यवीर्य्यशालिनं शीलदाक्षिण्यवन्तं च श्रीमण्डितं त्वामभिनन्दन्तु प्रजाजनाः सुखेन ।

सदस्याः—जयतु जयतु अभिमन्युनन्दनः । विजयतां कुरुप्रवीरः ।

युधिष्ठिरः—साधु साधु । (परीक्षितं प्रति), तत् श्रीमन्, सुविशालमिदं कुरूणां पुण्यक्षेत्रं वीरकीर्त्तिसमुज्ज्वलमधुना तवैवाधिकारे वर्त्तते । एतां राज्यश्रियं तुभ्यं समर्प्य वयमद्य शान्तिमधिगच्छामः । अतः परं धर्म्मस्त्वामभिवर्द्धयतु ।

परीक्षित्—आर्य्याः, भवतां प्रसादमङ्गलं स्नेहगौरवं प्रतिगृह्णामि । तदत्र महाव्रतसाधने गुरुजनानां पुण्याशिषो मां परिचालयन्तु ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सदस्याः—जयतु नरपालः। विजयतां पाण्डवेयः।

[पुराङ्गना नवनरपतिं संवर्द्धयन्ति—ध्वनति च शङ्खध्वनिपुरःसरं मङ्गलवाद्यम्]

इति चतुर्थेऽङ्के द्वितीयं दृश्यम्।

पञ्चमोऽङ्कः—प्रथमं दृश्यम्

[प्रथमं दृश्यम्—वनभूमिः—निर्झरकल्लोलो ध्वनति—कूजन्ति विहङ्गमाः, स्वनति च झिल्लीरवः]

[प्रविशति मृगयावेशी परीक्षित्]

प्रविश्य परीक्षित्—दूरं पलायितः कुरङ्गः। नासौ नयनपथे वर्त्तते। परं शान्तिमयमेतत् काननम्। अत्र सुरभिवनवाताः प्रवहन्ति। चित्तं विनोदयन्ति च कलसङ्गीतैर्निर्झरकल्लोलाः। तदत्र विहङ्गकूजनमुखरे कुञ्जतले विश्राम्यामि। (उपविश्य क्षणान्ते) अहो, पुनरेष निर्गच्छति द्रुतं मृगशिशुः। तदनुसरामि चैनम्। (उत्थाय धावति)

[प्रविशति वनलक्ष्मीः]

प्रविश्य वनलक्ष्मीः—(राजानं प्रति) राजन्, शान्तिरसास्पदमेतत् तपोवनम्। तस्मान्नहि युज्यतेऽत्र प्राणिहिंसनम्।

निवृत्य परीक्षित्—देवि, तपोधनानां विघ्ननाशार्थं गृहीतमेतदस्त्रम्। तन्मृगया राजसु न दूष्यते।

वनलक्ष्मीः—बाढम्। किन्तु न हि युज्यतेऽत्र निःशङ्कविचरणशीलेषु तपोवनमृगेषु अस्त्राघातः। ते हि शान्तशीला न खलु विघ्नकारिणः। अतो निवृत्यतां व्यसनाद् धीमन्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

परीक्षित्—भगवति, प्रतिगृहीतं भवदीयानुशासनम्। एषोऽहं कार्म्मुकं बाणमुक्तं करोमि। (बाणं प्रतिसंहृत्य तुणीरे स्थापयति)

वनलक्ष्मीः—(सहर्षम्) साधो महीपाल, युक्तमेतद् भवतः कुलधर्म्मपालनम्। किञ्च, माननीयोऽभ्यागतोऽसि। तत् स्वागतं ते ज्ञापयामि।

परीक्षित्—(कृताञ्जलिः) नमोऽस्तु वनदेवतायै। देवि, वन्देऽहमत्रभवतीम्। (वन्दते)

वनलक्ष्मीः—जयतु महाभागः। किञ्च, इह च्छायाशीतलेषु पल्लवघन-पुष्पित-काननेषु क्रियतां सुखविहारः। अत्र च सुरसफलानि सन्ति। आह्रियन्तां च तानि भोजनार्थं प्राकाम्येन। (प्रस्थानं करोति)

परीक्षित्—अहो, प्रस्थितेयं वनदेवी। तदहमपि पश्यामि, कुत्र मेऽनुचरा विचरन्तीति। (कतिचित् पदानि गत्वा) भो भो राजानुचराः, कुत्र यूयं तिष्ठथ? (उच्चैः प्रतिध्वनिः) न हि समागच्छति प्रतिवचनम्। मन्ये, दूरतो विभ्रान्ता मेऽनुचराः। उपसृत्य पश्यामि। (उपसर्पति)

नेपथ्ये वनलक्ष्मीः—भो भो वृक्षदेवताः, अभिमन्युनन्दनं नरपालं फलपुष्प-च्छायादानेन संवर्द्धयत। [पटपरिवर्त्तनम्]

[दृश्यते आश्रम गृहम्—विहगाः कूजन्ति—दूरतश्च आगच्छति गंभीर ओङ्कारगीतनादः—"ओम्।" तत्र च ध्यायति समाहितो महर्षिः।]

उपसृत्य परीक्षित्—अत्र पञ्चवटीवेदिकायां दृश्यते कश्चित् तापसः। पृच्छा-म्येनम्। (उच्चैस्तापसमुपलक्ष्य) भोः, किं दृष्टा भवता मे परिजनाः?

[मुनिर्मौनं तिष्ठति—सर्व्वत्र नीरवता]

पुनः परीक्षित्—भोस्तापस, कथ्यतां कृपया किं राजानुचरा अनेन पथा प्रचलन्तीति।

[मुनिर्ध्यायति, न यच्छति प्रतिवचनम्]

परीक्षित्—(सक्रोधम्) अहो, असौजन्यमस्य तपस्विनः। यतः पृष्टोऽपि नहि प्रददाति प्रतिवचनम्। तद् दण्डनीयमस्य दौःशील्यम्। (मुनिं प्रति)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

भोस्तापस, एष ते अशिष्टाचारहेतुको दण्डः। (अन्तिकात् मृतसर्पमानीय धनुष्कोट्या मुनिकण्ठेऽर्पयति)।

नेपथ्ये शृङ्गी—(उच्चैः) अब्रह्मण्यम् — अब्रह्मण्यम्। (द्रुतं प्रविशति) (प्रविश्य पितरं वीक्ष्य) हा धिक्! कोऽयं दुरात्मा पूजनीये मम पितरि एवमनार्यमाचरति?

परीक्षित् उपसृत्य—(सविनयम्) तपोधन, पृष्टोऽपि अत्र भगवान् उत्तरं न ददाति। स्वजनविच्युतोऽहं च परिश्रान्तः। तेन मतिभ्रमान्नहि विज्ञातं मया यदेष ते जनकस्तपस्यतीति।

शृङ्गी—(सरोषम्) मदान्ध, ऐश्वर्य्यगर्व्वादवमानितस्त्वया ततो मे लोकपूज्यो जनकः? धिक् त्वामधर्म्माचारिणम्! अतः पतितोऽसि मूढ पाप-कार्य्येण।

परीक्षित्—(सविनयम् कृताञ्जलिः) श्रूयतां ब्राह्मण, नाहं मुनिवरस्तपस्यतीति जानामि। अतः क्षमस्व माम्।

शृङ्गी—नहि नहि। यतस्त्वयावमानितस्तपस्वी, ततस्त्वामभिशपामि, सप्तमे दिवसे तक्षकस्त्वां दङ्क्ष्यतीति। [नैपथ्ये आर्त्तस्वरः]

परीक्षित्—क्षम्यतामपराधः। भगवन्, अविवेकवशादनार्यमाचरितं मया। तद् रक्ष माम् ब्रह्मन्। (चरणयोः पतति)

शृङ्गी—(स्वगतम्) अहो, किं करोमि? (नृपं प्रति) राजन्, कदापि नान्यथा भवति ब्रह्मचारिणां वचः। तथाप्यहमनुतप्तः प्रत्याहरामि अभिशापम्।

परीक्षित्—(उत्थाय) करुणामय, एषोऽहमपसारयामि मृतसर्पं गुरुजनकण्ठदेशात्। (सर्पमपसार्य दूरे क्षिपति) (मुनिवरस्य शमीकस्य पादयोः पतित्वा) भगवन्, करुणामय, लोकपावन महर्षे, नितरामहमपराद्धो मन्दभाग्यः! तत् क्षमस्व मे पुत्रकल्पस्यापराधम्।

शमीकः—(ध्यानमुक्तः प्रोन्मील्य नयने) कोऽसि त्वम्? कथं खिद्यसे अनुशयेन।

शृङ्गी—(पितरं प्रति) तात, बुद्धिवैकल्यादयं रोषपांशुलस्त्वयि अशोभनमाचरन् अनुतप्यते।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

परीक्षित्—(उच्छ्वसितकण्ठेन) देव, अभिशप्तोऽहमशरणो भवन्तं शरणं गच्छामि। अधुना कृपां विधेहि भगवन्।

शमीकः—(क्षणं ध्यात्वा नेत्रयुगमुन्मील्य) अहो, कोऽयमनर्थः सञ्जातः? (शृङ्गिणं प्रति) अब्राह्मणोचितोऽयमभिशापस्ते पुत्र। भारतगौरव-भूतोऽयमभिमन्युनन्दनः क्षुत्पिपासाक्लिष्ट अत्रातिथ्यमुपागतः। ध्यान-मग्नत्वादजानता मया न खलु विहितमाचरितं मान्यजनाय। त्वमपि अकरुणस्तमभिशपन् स्वधर्म्माद् विच्युतोऽसि। जातश्च ते तपःक्षयः। अतः प्रसादय अतिथिम्।

शृङ्गी—(निर्विण्णः) अपराद्धोऽस्मि गुरो, एष प्रत्याहृतो मया अभिसम्पातः। (राजानं प्रति) राजन्, प्रतिसंहरामि शापवचनम्। अतःपरं देदीप्यता-मत्रभवान् विपर्ययाद् रक्षितो मेघमुक्तो यथा निशाकरः।

शमीकः—साधु साधु स्वस्त्यस्तु नरपतये। ॐ स्वस्ति ॐ स्वस्ति।

शृङ्गी—अहो! एतत् सत्यमस्तु गुरुजनाशीर्वचनम्। शतं जीवतु नरपतिः।

शमीकः—(नृपं प्रति) नरमणे, अधुना प्रतिगच्छ त्वं स्वपुरमदीनमनसा। ततश्च दानधर्म्म-पुण्यकथाश्रवणादिना कृतस्वस्त्ययनः शान्तिमाप्नुहि। आशिषं ते करोमि भद्रं वो भूयादिति। [करेणाशिषं करोति]

शृङ्गी—(नृपमुद्दिश्य) तपसा भवतु आयुष्मंस्ते अशुभानां विनाशः। भूयाच्च सर्वथा भवतां दुष्कृतिक्षयः।

परीक्षित्—(उभयोः पादवन्दनां करोति) नमो नमो ब्राह्मणेभ्यः। नमोऽस्तु तपोधनेभ्यः। (नत्वा प्रस्थानं करोति)

शमीकः—(स्वगतम्) धर्म्मो रक्षतु धार्म्मिकम्। किन्तु, कथमेवंविधो भवति व्यतिकरः? अहो, मा भूयादनाथेयं वीरधात्री वसुन्धरा विपर्ययेण।

नेपथ्ये कश्चित्—(उच्चैः) युगावसानमायाति। एतद्धि कलेराविर्भावं सूचयति।

इति पञ्चमेऽङ्के प्रथमं दृश्यम्

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

द्वितीयं दृश्यम्

[गङ्गातीरे प्रायोपवेशनेन हरिकथां शृणोति परीक्षित्—अदूरे ऋत्विजो होमं कुर्वन्ति—भवन्ति च भगवन्नामकीर्त्तनानि । दर्भासनासीनं नरपतिं शुकदेवो भागवतं श्रावयति]

(नेपथ्ये—ॐ ब्रह्मणे स्वाहा—ॐ विष्णवे स्वाहा—ॐ रुद्राय स्वाहा

ओम्

दर्भासनोपविष्टः परीक्षित्—नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

[शुकदेवं प्रति] तपोधन, धर्म्मो विजयताम् । अतो भवदीयमुखारविन्दात् पुण्यां भागवतीं कथां श्रुत्वा पवित्रो भवितुमिच्छामि]

शुकदेवः—[सहर्षम्] शृणु राजन्,

सतां प्रसङ्गान्ममवीर्यसंविदो
भवन्ति हृत्कर्णरसायनाः कथाः ।
तज्जोषणादाश्वपवर्गवर्त्मनि
श्रद्धारतिर्भक्तिरनुक्रमिष्यति ॥

तत् पुण्यात्मनो भवतः श्रीहरेः कृपया भगवत्कथाश्रवणे यदभिलाषः समुत्पन्नो नास्त्यत्र वैचित्र्यम्, जगत्पिता नारायणः जीवानुद्धर्त्तुकामो युगे युगे अवतरति, प्रकाशयति तस्य दिव्यां लीलां जगज्जनपरित्राणार्थम्, तामहं वाचयामि ।

परीक्षित्—अहो धन्योऽस्मि भगवन् भवतां कृपालाभेन, नमोऽस्तु परमर्षये व्यासनन्दनाय, [वन्दते] देव, तदारभ्यतां सङ्कल्पितो भगवत्कथाप्रसङ्गः, पर्य्युत्सुकोऽस्मि तच्छ्रवणाय ।

शुकदेवः—श्रूयतां राजन्, एषा पतितपावनी हरिकथा गङ्गाधारेव सुविमला सर्वसन्तापमपहरति । पावयति, तारयति च देहिनं श्रीविष्णुपदपङ्कज-प्रापणाय ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

परीक्षित्—साधु साधु ततस्ततः ?

शुकदेवः—सेयं मत्पितुः श्रीकृष्णद्वैपायनस्य प्रसादादधिगता पुण्येयं भागवती कथा कृच्छ्रसाधनेन, प्रचार्य्यते च तदधुना भवतां भक्तिरसोद्दीपनाय।

(नेपथ्ये कश्चिद् गीतस्वरेण गायति)

निगमकल्पतरोर्गलितं फलं
शुकमुखादमृतद्रवसंयुतम्।
पिवत भागवतरसमालयं
मुहुरहो रसिका भुवि भावुकाः॥

परीक्षित्—अहो, मधुनिस्यन्दिनी भागवती वाणी श्रुतिपथगामिनी मर्म्मं मे प्लावयति सुधाप्रवाहेण। ततश्च देव!

शुकदेवः—(गीतिस्वरेण)

तुलसीकाननं यत्र यत्र पद्मवनानि च।
पुराणपठनं यत्र तत्र सन्निहितो हरिः॥

किञ्च— वेदे रामायणे चैव पुराणे भारते तथा।
आदावन्ते च मध्ये च हरिः सर्व्वत्र गीयते॥

ब्राह्मणाः—जयति श्रीहरिः, जयति श्रीहरिः।

शुकदेवः—ततश्च श्रूयताम्।

समाश्रिता ये पदपल्लवप्लवं
महत् पदं पुण्ययशो मुरारेः।
भवाम्बुधिर्वत्स पदं परं पदं
पदं पदं यद्विपदां न तेषाम्॥

किञ्च— म्रियमाणो हरेर्नाम गृणन् पुत्रोपचारितम्।
अजामिलोऽप्यगाद् धाम किमु तच्छ्रद्धया गृणन्॥

परीक्षित्—मधुरं मधुरम्। अहो अमृतायते श्रीहरेर्नामकीर्त्तनम्। देव, भवदीयकण्ठविगलितमेतत् सुललितभागवतवचनामृतं भक्तजनं चिर-

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मानन्दयिष्यति, मोदिष्यन्ते च भारतवासिनश्चिरं भक्तिरसास्वादेन। तच्च पुनर्भगवन्महिमश्रवणलालसा मामुद्दीपयति।

शुकदेवः—साधु धीमन्। तद् भक्तिरसेनोल्लसितस्तृप्तिमास्वादयसि। ततश्च श्रूयताम्—

आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे।
कुर्व्वन्त्यहैतुकीं भक्तिमित्थम्भूतः सदा हरिः॥

परीक्षित्—विजयतां देवः। तृप्तोऽस्मि। नातः परमनित्यसुखेषु स्पृहा जायते, इच्छामि च भवसिन्धोः परित्राणम्। अतः सत्यो भवतु ब्राह्मणाभिशापः। किमनेन त्वगस्थिमय-मांसपिण्डवहनेन?

[प्रविशति पुरुषः]

(प्रविश्य) पुरुषः—देव, समागतः।

परीक्षित्—क इह समागतो वार्त्तावह।

दौवारिकः—ब्राह्मणो राजन्।

परीक्षित्—(सचकितः) ब्राह्मणः? प्रवेश्यतामिह। अहो भाग्यं यद् भूदेव आगच्छति।

[प्रविशति पुरुषेण सह ब्राह्मणो गृहीतफलपुष्पकरण्डकः]

ब्राह्मणः—(प्रविशन्) ओम् हरिरोम् नारायणः।

परीक्षित्—(ससम्भ्रममुत्थायाभ्यर्थयति)—स्वागतं विप्रवर्यस्य। तदिह पुण्यासनमलङ्क्रियताम्। नमस्ते भगवन्।(वन्दते)

(उपविशन्) ब्राह्मणः—स्वस्ति स्वस्ति। परमं श्रेयस्ते भवतु।

परीक्षित्—सत्यमस्तु ब्राह्मणस्याशीर्वचनम्।

शुकदेवः—साधु साधु। सत्यमेव विजयते।

ब्राह्मणः—(नृपतिमुद्दिश्य) नरमणे, आकर्णितो मया भवतां हरिकथा-

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

श्रवणवृत्तान्तः। अनेन सत्त्वोत्कर्षेण धर्म्मसेवन-माहात्म्येन च पूर्ण-मनोरथो भवान् प्रमोदताम्। तेनाहं भवन्तं शुभाशिषा संवर्द्धयितु-मागच्छामि।

परीक्षित्—अनुगृहीतोऽस्मि ब्राह्मण। धर्म्मो विजयताम्। नमोऽस्तु भवते। (नमति)

ब्राह्मणः—नरमणे, अनेन सत्यपालनेन भगवदनुरक्तिमाहात्म्येन च छिद्यतां ते सर्व्वबन्धनम्। तन्मोदस्व परमपदलाभेन।

परीक्षित्—श्रीविष्णुः प्रीयताम्। श्रीविष्णुः श्रीहरिः।

ब्राह्मणः—तत् कुरुवंशप्रदीप, नारायणस्ते प्रसीदतु। गृह्यतां चैतत् फल-पुष्पाशीर्निर्माल्यं श्रेयोलाभाय। (राज्ञेऽर्पयति) भवतु च प्राकाम्येण तव मनोरथसिद्धिः शुभाय।

परीक्षित्—(कराभ्यां फलमाल्यादिकं गृहीत्वा) गृहीतो ब्राह्मणप्रसादः। नमो नमो ब्राह्मणः नमस्ते भूदेवाय। (शिरसा प्रणमति)

ब्राह्मणः—राजन्, इयं ते अम्लानकीर्त्तिः सुचिरं भूतले प्रचरिष्यति। तदधुना स्वस्थानं प्रतिगच्छाम्यहम्। भद्रं तेऽस्तु।

(प्रस्थानं करोति)

परीक्षित्—(स्वगतम्) सत्यमस्तु ब्राह्मणवचः। मनोरथसिद्धिर्मेऽस्तु ब्राह्मणवचनात्। (मुद्रितनेत्रः) भगवन् भूतभावन, एषोऽहमात्मानं ते निवेदयामि।

शुकदेवः—ओम् हरिः ओम् नारायणः—ओम् हरिः ओम् नारायणः। ॐ नारायणः। [नेपथ्ये वीणा करुणं ध्वनति]

इति पञ्चमेऽङ्के द्वितीयं दृश्यम्

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तृतीयं दृश्यम्—हस्तिनापुरे यज्ञस्थलम्

[होमवेदिकां परितः पुरोहिताः उपविशन्ति, पात्रेषु विन्यस्तो यथायोग्यद्रव्यसम्भारः। प्रविशति होतृवेशेन जनमेजयः।]

(प्रविश्य) जनमेजयः—भो ऋत्विग्वर्य्याः, नागकुलविनाशार्थं परिकल्पितो मयैष यज्ञः। तद् आरभ्यतां शुभानुष्ठानमचिरेण।

पुरोहिताः—ॐ स्वस्ति स्वस्ति स्वस्ति। अयमारम्भः शुभाय भवतु। (शङ्खो ध्वनति)

जनमेजयः—ॐ ब्रह्मणे स्वाहा। ॐ विष्णवे स्वाहा। ॐ रुद्राय स्वाहा।

पुरोहिताः—ॐ नमो नवग्रहेभ्यः स्वाहा। दिक्पालेभ्यः स्वाहा। ॐ नमो नारायणाय श्रीविष्णवे स्वाहा। [सर्वे जुह्वति]

जनमेजयः—एताः प्रज्वलिता होमानलशिखा भस्मीकुर्वन्तु निखिलनागकुलं मन्त्रबलेन। तेन तृप्यतु मे नागदंशनात् पञ्चत्वमुपागतः पिता।

पुरोहिताः—साधु साधु।

जनमेजयः—(सदस्यान् प्रति) माननीयाः सभासदः, एतद्यज्ञप्रसङ्गेन भूरिदानं मया सङ्कल्पितम्। तेन अद्यारभ्य उन्मोचितस्तिष्ठति राजकोषो दान-धर्म्माचरणाय।

सदस्याः—जयतु जयतु प्रजापालः।

अन्ये—विजयतां सत्यव्रतो राजर्षिर्जनमेजयः।

जनमेजयः—अतो ब्राह्मणेभ्यस्तथा याचकेभ्यः प्रदीयन्तां पुस्कलधनरत्न-वसन-भोज्यानि। ननु न कोऽपि प्रतिगच्छेद् विमुखोऽनादृतो वा अपूर्ण-मनोरथो द्विजो वर्णेतरो वा।

सर्व्वे—विजयतां नरेन्द्रः।

जनमेजयः—(आहुतिं गृहीत्वोदात्तस्वरेण जुहोति) तृप्यस्व हुताशन मम शेषाहुतिदानेन। ॐ तक्षकेण जुहोमि स्वाहा।

[नेपथ्ये अश्रुतपूर्व्वः शब्दः]

ॐ वासुकिनागेन हुताशनं तर्पयामि स्वाहा।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

[पुनर्गुरुगम्भीरोऽपूर्व्वध्वनिः]

[प्रविशति ब्राह्मणवेशी]

प्रविश्य ब्राह्मणः। अब्रह्मण्यम्—अब्रह्मण्यम्। राजन्, कथं क्रियते प्राणिहिंसनमिष्टसाधनेषु ?

जनमेजयः—(ससम्भ्रमम्) स्वागतं विप्रवर्य्यस्य! देव, विश्वकल्याणार्थमयं यज्ञोऽनुष्ठीयते।

ब्राह्मणः—नरनाथ, तर्हि कथमकारणं जीवानां प्राणनाशः क्रियते ? विरम्यतामतो नागाहुतिप्रदानात्।

जनमेजयः—भूदेव, पितुः प्राणघातिनस्तक्षकस्य पापेन वैरीभूतं मे नागकुलं विनाशयामि। तेन सर्वथा भस्मीभवन्तु अखिलनागगणाः विश्वेषां कल्याणाय।

ब्राह्मणः—तेन च ते किं फलं भवेत् ?

जनमेजयः—अनेन स्वर्गस्थः पिता मे नागानां विनाशात् तृप्तो भविष्यति। एष एव मे पितृहेतुको धर्म्मः। तदर्थमयं यागः।

ब्राह्मणः—श्रूयतां नरपाल! धर्म्मो हि सत्यपालनम्। यज्ञश्च त्यागात्मकं कर्म्म। तत् पूर्य्यतामद्य मे मनोरथ ईप्सितवस्तुदानेन।

जनमेजयः—अथ किमभिलषति भवान्!

ब्राह्मणः—राजन्, सत्यपालस्त्वं। देदीप्यस्व सत्यधर्म्मरक्षणेन। पालय सत्यव्रतम्।

जनमेजयः—का ते हृद्गता वासना देव? सर्व्वथाहं पूरयिष्यामि भवतो मनोरथम्।

ब्राह्मणः—उत्तमम्। देहि मे नागानां प्राणदक्षिणां नरमणे तेषामुज्जीवनाय। तेन धर्म्मं पालय वीर सत्यधर्म्माचरणेन।

जनमेजयः—अहो अब्रह्मण्यमब्रह्मण्यम्। नैतत् शक्यते मया। न हि मर्षयामि नागान्। यतो नागकुल-विनाशार्थमेष मे यज्ञः।

ब्राह्मणः—गुणमणे, सत्येन विधृतं जगत्। धर्म्मश्च सत्ये प्रतिष्ठितः। अतः क्रियतामद्य सत्यपालनं ममाभीष्टप्रदानेन।

जनमेजयः—(विह्वलः) दैवी माया! अहो दैवी माया! तद् भो देव, कथय, किं प्रजापतिरसि त्वं विश्वस्रष्टा, उत विष्णु रुद्रो वा निखिलभुवनगोप्ता,

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नागान् जीवयितुमत्र समागतः ? अथवा कथय किमायासि विधिनिर्देशात् परीक्षार्थं मम सत्यसाधनव्रतस्य ?

सर्व्वे—(ललितस्वरेण) नमो धर्म्माय महते, नमः सत्याय वेधसे ।

जनमेजयः—(स्वगतम्) अहो नु भोः, कोऽयं मध्याह्नमार्त्तण्डच्छविर्ज्वलदग्नि-भास्वरः, समुद्भासिताशेषदिङ्मण्डलो लीलयात्र मे पुरत आविर्भवति ! किञ्च, शरदभ्रसमुज्ज्वलोऽयं रमणीयरूपच्छटया दिशः सन्दीपयन् दृष्टिं विमोहयन् मनो विकलयन् उन्मादयति मां नयनविलासेन ! (ब्राह्मणं प्रति) अथ कोऽस्ति अत्रभवान् भगवन् ?

ब्राह्मणवेशी—श्रूयतां राजन् ! तपोधनोऽस्मि जरत्कारुनन्दनः आस्तिक इति विश्रुतः, संवर्द्धितश्च वानप्रस्थव्रतिनो जनकस्य तपोबलेन । माता च मे नागजननी । एवमुपस्थितोऽहं त्वत्सकाशमिह नागानां प्राणरक्षणाय जनन्या समादिष्टः । तद् दीयतां मे नागानां प्राणभिक्षा त्रैलोक्यस्य कल्याणाय ।

जनमेजयः—(दीर्घं निःश्वस्य) अहो, विजयते विधातुर्विधानम् । दुर्बोध्या खलु च देवतानां लीला, तत् किमत्र करोमि ? (ब्राह्मणं प्रति) भो तपोधन, सिद्धाः सन्तु भवतो मनोरथाः । जीवन्तु च नागाः । किञ्च, ब्राह्मण-शापवचनानां सत्यतासाधनार्थं पित्रा मे प्रायोपवेशनव्रतिना हरिकथा-श्रवणविधौतकल्मषेण आत्मोत्सर्गोऽनुष्ठितः । तेन सत्यं पालयितुकामेन मयापि भवतो मनोरथः सम्पूर्य्यते । अतः पूरयामि भवदीयमभिलाषम् । एषोऽहं नागाहुति-प्रदानान्निवृत्तो भवामि ।

ब्राह्मणवेशी—विजयस्व वीर । भारतभूषणस्त्वं वर्द्धस्व राज्यश्रिया । किञ्च, कुरूणां तपोमहिममण्डितमेतत् पुण्यक्षेत्रं वीरकीर्त्तिसमुज्ज्वलं, विमलो-दारया तव यशःकथया परिपूरितमस्तु, कनकरत्नशस्यसुसमृद्धं सुख-शान्तिसमन्वितं च चिराय ।

सर्व्वे—जयतु जयतु जनमेजयः । जयतु जयतु धर्म्मः ।

ब्राह्मणवेशी [राजानं प्रति]—अतो ब्रूहि राजन्, किमतःपरं ते प्रियं करोमि ?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

जनमेजयः—देव, अतःपरं किं प्रियमस्ति? त्रातोऽहं व्रतभङ्गकलुषात्। रक्षितश्च धर्म्मो मे भवतामनुग्रहेण। तथापीदं प्रार्थये—

[भरतवाक्यम्] प्रवर्त्ततां पुण्यतपस्तपस्विनां
निरङ्कुशं शान्तिमयं भवेद् गृहम्।
जनाः कृतार्थाः प्रभवन्तु धर्म्मगा
रत्नेन पूर्णा धरणी सदास्तु नः॥

[प्रविशति पुरलक्ष्मीर्गायति च गानं राजर्षिसंवर्द्धनाय]

गानम्

मनोमन्दिरे विहर, जय भारतभूषण,
पुण्यनिलय गुणमय जय, विजयकीर्त्तिमण्डन।
शुद्धचरित गरिमोज्ज्वल
अमितवीर्य वृत्तमङ्गल
करुणाशय सत्यपाल, निखिलमनोरञ्जन।
जय भारत-वीरभूषण॥
राजते शुभ्रगगने तव वीरकीर्त्तिलेखा
कनकारुण-रञ्जितकर-महिमामलरेखा,—
दिशि दिशि तव विजयगानं
ध्वनतु सहवीणातानम्
अरातिदमन, जय जय जय, पुण्यकीर्त्तिकेतन,
जय दानवीर, पूत, धीर, कौरव प्रजारञ्जन।

यवनिकापातः

पञ्चमाङ्के तृतीयं दृश्यम्

इति समाप्तं महामहाध्यापक-कृष्णकान्तकृतिरत्नात्मजेन सुरभारती-चरणसरोजमकरन्दमधुपेन श्रीविश्वेश्वरविद्याभूषणकाव्यतीर्थ-देवशर्मणा विरचितम् उत्तरकुरुक्षेत्रं नाम नाटकम्

ॐ ब्रह्मार्पणमस्तु

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

Some valuable works in modern Sanskrit

for use in Universities, Colleges, Schools, libraries and Cultural Institutions.

By—**Prof. Dhyanesh Narayan Chakravorty**
Sahitya-Sastri, M.A.
(*Rabindra Bharati University, Calcutta.*)

1. *Mukta-Dhārā*—Sanskrit reproduction of Rabindranath's illustrious play. Highly appreciated by Prof. Dr. S. Radhakrishnan, Prof. Dr. Guiseppe Tucci, Prof. Dr. Louis Renou, Prof. Dr. Fredrich Heiler, M. M. Kālīpada Tarkācrārya, Dr. Sunīti K. Chatterjee, Dr. Satkari Mukherji, Sj. Hiranmay Banerjee and others. Successfully staged and broad-cast.
   Price—Rs. 5/-
2. *Vārtā Griham*—Do
3. *Jana-Śikṣā O' Saṃskṛta*—A handsome review in Bengali with valuable discussions dealing on the beauties of Sanskrit and it's influence and utility in the progress and reconstruction of social, moral, cultural and political life of India ; furnished with parliamentary and valuable speeches and opinions of eminent scholars, politicians, lawyers and leaders. Especially helpful to B. T. Trainees and teachers of Sanskrit and world literature.
   Price—Rs. 5/50

To be had of

1. **"Rishi-Dham"**
   Po. Dattapukur.
   Dt. 24 Parganas. W
2. **"Sanskrita Pustak Bhanda**
   38, Bidhan Sa

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha